**Sri Sharada Peetham, Sringeri**
**MANUSCRIPT PRESERVATION CENTRE**

A/C. NO. NEW 239 OLD 207

FOLIO 066

**TITLE**

1. कारिकावलीसहित मुक्तावली ।
2. व्याधिकरणटिप्पणी ।

अथजागदीशीव्यधिकरणटिप्पणंकालीशंकरीप्रारभ्यते

जा॰व्यु ॥श्रीगणेशाय नमः॥ नन्विदं वाच्यं ज्ञेयत्वादित्यत्र समवायितया वाच्यत्वाभावरूपस्य साध्याभावस्याप्रसिद्धावपि प्रमेयवान् वाच्यत्वादित्यादि
का॰ शं केवलान्वयिनि तदप्रसिद्धेरनुद्धारान्मूलस्य न्यूनत्वमत आह। प्रमेयसाध्यके चेति जगदीशेनोक्तम्॥ नन्वत्रापि समवायितया वाच्यत्वाभा॰
१ वस्यैव स्वीयलक्षणघटकत्वसंभवे भावान्तरानुसरणस्य स्वव्यापकसाध्यतावच्छेदकव्यापकप्रतियोगिताकाभावघटितवक्ष्यमाणसार्व
भौमीयलक्षणाभिप्रायकतया भावत्वेनाभावाभावीयप्रतियोगित्वस्य प्रमेयत्वरूपसाध्यतावच्छेदकाव्यापकत्वात् भावत्वेनाभावाभावस्य लक्षणा
घटकत्वं दुर्वारमेवेति चेन्न। समनियताभावानामैक्यमते नैव तदभिधानादिति। अथ किं स्वरूपसंबंधेन तादात्म्येन वा प्रमेयस्य साध्यतायामभा
वप्रसिद्धिः कृतेति। नाद्यः वह्नित्वेन प्रमेयाभावं परित्यज्य वृत्तिमात्रवृत्ति गगनत्वादिना प्रमेयाभावानुधावनस्य संदर्भविरोधापत्तेः। नापि द्वि
तीयः। ननु कालिकसंबंधेन प्रमेयसाध्यकस्थले कालिकसंबंधेन साध्याभावस्याप्रसिद्धिः कार्या इत्यव्यवहितवक्ष्यमाणजागदीश्यसंगते॰
स्तादात्म्येन साध्यतायामपि तद्दोषस्य संभवे स्थलान्तरानुधावनवैयर्थ्यादिति। संबंधसामान्येन साध्यतायामपि तद्दोषस्य जागरूकत्वादि
ति चेन्न। संबंधसामान्येन साध्यतास्थले वाप्रसिद्धेः कृतकत्वात्। ननु कालिकसंबंधेन प्रमेयसाध्यकस्थले इत्यादि जगदीशग्रन्थस्य संबंधसा॰
मान्यान्तर्गतकालिकसंबंधस्यापि साध्यतावच्छेदकसंसर्गत्वमित्यभिप्रायकत्वादिति १ अप्रसिद्धिदोषस्यैव सत्वान्मूले प्रतियोग्यवृत्तित्वे
त्यादिदोषान्तरं किमर्थं अतः तदवतारार्थं शंकते। नन्विति। अव्यभिच रितत्वमिति। अथेदं वाच्यं ज्ञेयत्वादित्यादि ग्रंथाभिप्रेतमिति शेषः। तथा
च नचैवं घट इत्यादि मूलस्य केवलान्वयिनि व्यभिचारित्वेनालक्ष्यताप्रदर्शनपरत्वान्न पूर्वापरमूलासंगतिरिति ध्येयमिति जगदीशः। अथैवं
तर्हि तादृशसामानाधिकरण्याभावो व्याप्तिरिति मूलासंगतिः अथेदं वाच्यं ज्ञेयत्वादिग्रंथस्य पारिभाषिकाव्यभिचरितत्वाभिप्रायकतया तादृ राम
शवृत्तित्वसामान्याभावस्य व्याप्तित्वाभिधानानुपयुक्तत्वादिति चेन्न। अथेदं वाच्यं ज्ञेयत्वादित्यादिमूलस्य पारिभाषिकाव्यभिचरितत्वाभि १

घटकतयानचैवमित्यादिमूलस्याप्यलक्ष्यताप्रदर्शनपरत्वेनचसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकेत्यादिग्रन्थस्यालक्ष्यतापरि
हारपरत्वात्। ननुअव्यभिचरितत्वस्यपारिभाषिकपरत्वेव्यभिचाराधीनविरोधिज्ञानविषयत्वस्यैवव्याप्तित्वनियमभंगःस्यादित्यत
उक्तंमूले। तादृशसामानाधिकरण्याभावोव्याप्तिस्तत्संगतेः। तस्याप्रामाणिकत्वाभिप्रायेणशंकते। प्रतियोग्यवृत्तिश्चेति। अत्रयत्समानाधि
करणात्यन्ताभावस्यानुक्तौसाध्यव्यापकप्रतियोगितावच्छेदकप्रतियोगिताकस्यात्मत्वसामान्याभावस्यापियावदंतर्गतत्वात्तस्यचव्यापकताघ
टकसमवायसंबंधेनप्रतियोग्यधिकरणेकेनापिसंबंधेनावृत्तित्वात् अयमात्माज्ञानादित्यादावव्याप्तिरतस्तदुपात्तमित्यग्रेस्फुटीभविष्यति
इतिजागदीशी। ननुसर्वत्रैवगगनाभावाभावस्यतादृशत्वात्तस्यचयावदन्तर्गतस्यहेत्वधिकरणावच्छेदेनप्रतियोगिसामानाधिकरण्या
भावादसंभवइतितत्कथंपरित्यक्तमितिचेन्न। तादृशाभावस्यवृत्तिमत्त्वेनविशेषणीयत्वात्। तथाच तादृशाभावस्यगगनरूपतयावृ
त्तिविरहात्तमादायनासंभवइति। ननुव्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकैकदेशवृत्त्यभावस्यैकदेशभेदस्यचसर्वैरेवस्वीकारात्।
आत्मघटयोर्नात्मत्वमितिप्रतीत्याउभयत्वावच्छेदेनात्मन्यप्यात्मत्वसामान्याभावस्यसत्त्वेनतत्रव्यापकताघटकसमवायसंबंधेनप्र
तियोगिसामानाधिकरण्यप्रसिद्ध्याअयमात्माज्ञानादित्यत्राव्याप्तिविरहेणकथंनतद्वारणाययत्समानाधिकरणदलंनिवेशितमिति। अत्रके
चित्। व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावानभ्युपगमात्। अन्यथायत्समानाधिकरणदलनिवेशेऽपिधूमवान्वह्नेरित्यादावतिव्या
प्त्यापत्तेर्धूमाद्यभावस्यपर्वतायोगोलकोभयत्वावच्छेदेनपर्वतादौसत्त्वेनसाध्यव्यापकतावच्छेदकप्रतियोगिताकत्वविरहेणलक्षणाघट
कत्वादित्याहुः। तन्न। साध्यव्यापकताघटकसाध्यवद्वृत्तित्वस्यव्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणत्वानिरूपितत्वनिवेशेनैवधूमाद्य
भावस्यलक्षणाघटकतयाधूमवान्वह्नेरित्यादावतिव्याप्त्यनवकाशात्। व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावानभ्युपगमस्यानुचि

गा·व्या· तत्वादि ति॥ अत्रेदं समाधीयते। रूप ध्वंसाभावाभावस्य यावदन्तर्गतस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्या
भावेन तत्राव्याप्तिरतो यत्समानाधिकरणदलमिति। ननु वन्हिमान् धूमादित्यादावपि प्रलयाभावाभावस्य साध्यव्यापकतावच्छेदकप्रति-
ग·शां· योगिताकस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावेनाव्याप्तिसंभवः यम[illegible]।नादित्यादौ यत्समानाधि
२ करणदलव्यावृत्तिदानं। जगदीशस्यासंगतमितिचेन्न। महाप्रलयानंगीकारमतेः व्याप्तिविरहात्। तस्य महाकालान्तर्भावेण प्रतियोगि
सामानाधिकरण्याच्च स्वविशिष्टत्यादेरप्रवेशे तत्राव्याप्तिविरहात्। उभयथैवायुमात्माज्ञानादित्यत्राव्याप्तिसंभवे ग्रंथकारस्य तत्राव्या
प्तिदानस्य युक्तत्वादिति। वस्तुतस्तु महाकालस्यापि हेत्वधिकरणताया असत्वेपि हेतुसंबंधित्वात् स्वविशिष्टहेत्वधिकरणमहाकाला
न्तर्भावेण प्रलयाभावाभावे प्रतियोगिसामानाधिकरण्याद् व्याप्त्यनवकाशात्। प्रतियोगिसमानाधिकरण्याद्वन्हिमान् धूमादित्यादाव
व्याप्तेरेवासंभवादिति ध्येयम्। अथात्र आत्मत्वाभावस्यापि समानकालीनत्वादिसंबंधेन प्रतियोगिसमानाधिकरणात्कथमव्याप्तिरुक्तेति।
मैवम्। प्रतियोगिसमानाधिकरणाइत्यत्र प्रतियोग्यधिकरणवृत्तित्वस्यैव निवेशात्। संबंधित्वनिवेशे तु गगनाभावाभावस्य समानका
लीनत्वादिसंबंधेन प्रतियोगिसमानाधिकरणतया व्यधिकरणधर्मावच्छिन्नाभावं विनापि सर्वत्र लक्षणसमन्वयात् प्रतियोग्यवृत्तिश्चे-
त्यादिग्रंथानुत्थानप्रसंगः। नच हेतुसमानाधिकरणाइत्यपहाय साध्यसमानाधिकरणा यावन्तस्तादृशाभावाः स्वविशिष्टयद्धर्मावच्छि
न्नहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणास्तद्धर्मवत्त्वमित्येव लक्षणं कुतो न कृतमिति वाच्यं। द्रव्यमात्मत्वादित्यादौ महा
कालेसाध्यसमानाधिकरणस्य द्रव्यत्वादिसामान्याभावस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्याव्याप्तिप्रसंगात्। दैशिकविशेषणतयासा राम
ध्यसमानाधिकरणोक्तौ च गौरवादिति जगदीशः। अथात्र दैशिकविशेषणतया साध्यसामानाधिकरण्योक्तावपि द्रव्यत्वात्मत्वयोभयाभा २

वस्यापि तादृशस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्याऽव्याप्तिनादवस्थ्येन कथं गौरवमित्युक्तमिति चेन्न। वैशिष्ट्यव्यासज्यवृत्तिधर्मानव
च्छिन्नप्रतियोगिताकत्वेन साध्याधिकरणवृत्त्यभावस्य विशेषणीयत्वादिति। केचित्तु स्वप्रतियोगिसामानाधिकरण्यजगद्वृत्तिभिन्नत्वोभया
भाववत्त्वस्याभावविशेषणत्वान्नोक्ताभावमादायाव्याप्तिरित्याहुः। नचैवं तथापि समनियताभावैक्यमते। अयमात्मा आत्मगगनान्यत
रत्वादित्यत्राऽतिव्याप्तिर्व्यधिकरणधर्मावच्छिन्नाभावस्यैव तत्र साध्यसमानाधिकरणतया तस्य च यावत एव वाच्यत्वादिरूपप्रतियोगि
सामानाधिकरण्यादिति वाच्यम्। समनियताभावानामैक्यमनङ्गीकृत्यैव गौरवाभिधानादिति ध्येयं। यत्तु यत्समानाधिकरणा यावन्तस्तादृ
शाभावाः। साध्यसमानाधिकरणास्तत्त्वमित्येव लक्षणमस्तु स्वस्वप्रतियोगिसामानाधिकरण्यप्रवेशे बीजाभाव इति। तत्तुच्छं तथा सति य
त्समानाधिकरणा यावन्तोऽभावाः साध्यसमानाधिकरणा इत्यस्यैव सम्यक्त्वे साध्यव्यापकतावच्छेदकप्रतियोगिताकाद्यस्य व्यर्थत्वाप
त्तेरिति जगदीशाः। अथ यावत्पदोपादानेपि कालो गोमान् गोत्वादित्यादौ अतिव्याप्तिवारकतया हेत्वधिकरणावच्छेदेन साध्यसामानाधिक
रण्यं वक्तव्यं। अन्यथा गोत्वाभावस्यापि सृष्टिकालाद्यवच्छेदेन साध्यसमानाधिकरणत्वेनातिव्याप्त्यापत्तेः। इत्थं च यत्किंचिदभावो हेत्व
धिकरणावच्छेदेन साध्यसमानाधिकरण इत्यस्यैव सम्यक्त्वे यावदन्तस्य वैयर्थ्यं कथं नोक्तं जगदीशेनेति चेन्न। साध्याधिकरणवृत्तित्व
स्य दैशिकविशेषणतासंबंधेन वाच्यतया कालो गोमान् गोत्वादित्यादौ प्रलयान्यत्वाद्यभावस्य प्रलयात्वादिस्वरूपस्य दैशिकविशेषणतासं
बंधेन साध्याधिकरणे वृत्तितया अतिव्याप्तिविरहेण एतन्मते हेत्वधिकरणावच्छेदेन साध्यसामानाधिकरण्यस्यानुक्तत्वादिति। तथा च
यावत्पदानुक्तौ घटाद्यभावमादाय धूमवान् वह्नेरित्यादावतिव्याप्त्यापत्तेरिति। नच वन्ह्यादिसामान्याभावमादाय वह्निमान् धूमादित्यादा
वव्याप्तिरिति वाच्यम्। हेत्वधिकरणवृत्तित्वस्यापि दैशिकविशेषणतया वाच्यत्वादिति ध्येयम्। केचित्तु व्यापकत्वदलवैयर्थ्यकथनेन प्रति

जा॰ व्य॰ योग्यवृत्तीत्यादिमूलासंगत्याप्रकृतोपयोगित्वं यावत् पदस्य वैयर्थ्यकथनं तु न प्रकृतोपयोगि इति तत्तन्नोक्तं जगदीशेनोक्तइत्याहुः। अथा
का॰ शं॰ त्रप्रतियोगिसामानाधिकरण्यघटितलक्षणेपि विशिष्टाभावोभयाभावादिकमादाय व्यधिकरणधर्मावच्छिन्नाभावासत्वेपि लक्षणगमनसं
३ भवेन प्रतियोग्यवृत्तिश्चेत्यादिग्रंथानुत्थितिप्रसंगस्य स्वयं वक्ष्यमाणत्वेन इदानीमेतत्कल्पे तदभिधानमनुचितमिति चेन्न। एतल्लक्ष
णकृन्मते विशिष्टाभावस्य प्रतियोगित्वं वैशिष्ट्ये उभयाभावस्य प्रतियोगित्वं। यदभावप्रयुक्तोभयाभावस्तस्मिन्नेव स्वीक्रियते विशि॰
ष्टाभावस्य विशेष्यप्रतियोगिकत्वमुभयाभावस्य उभयप्रतियोगिकत्वमिति मतानुसारेण वीजमात्रमुपन्यस्य तत्तदभिधानादिति
। एवं च कस्यचिन्मते एतल्लक्षणेपि व्यधिकरणधर्मावच्छिन्नाभावोत्थितिरस्त्येव साध्यसामानाधिकरण्यघटितलक्षणे तदपि नास्ती
तिभावः। अथात्र यत्समानाधिकरणा यावन्तास्तादृशाः भावाः भावभिन्नाइत्यस्यैव सम्यक्त्वे स्वस्वप्रतियोगिसामानाधिकरण्यप्रवेशो
व्यर्थ इति हेत्वधिकरणवृत्तित्वं च विशेषणतयाबोध्यं तेन वन्हिसंयोगात्मकाभावमादाय वह्निमान् धूमादित्यादौ नाव्याप्तिरिति न च तथा
पि प्रतियोगिवैयधिकरण्यघटितव्यापकताकल्पेपर्वतइतियत्किंचिज्ज्ञानयज्ज्ञानविषयत्वाभावाभावस्य भावभिन्नत्वाभावेन तमादा
य वन्हिमान् धूमादित्यादावसंभव इति वाच्यं। प्रतियोगिवैयधिकरण्याघटितव्यापकत्वस्यानुशरणीयत्वादिति। अत्रोच्यते। सप्तपदा॰॰
र्थातिरिक्तपदार्थस्यानभ्युपगं तृमते। अभावत्वस्याभाववृत्तिप्रतियोगित्वादेश्चाभावात्मकतयाघटाभावभिन्नमभावत्वात् इत्यत्रा राम॰
तिव्याप्तिः। हेत्वधिकरणवृत्त्यभावमात्रस्यैव भावभिन्नत्वादिति। अथ यत्समानाधिकरणा यावन्तस्तादृशाभावाप्रतियोगिवृत्तय इत्य ३

स्यसम्यकृत्वेऽतं गुरुतरस्वस्वप्रतियोगिसामानाधिकरण्यनिवेशेनेतिचेन्न। वह्निमान् धूमादित्यादौ साध्यव्यापकतावच्छेदकप्रतियोगि॰
स्यसम्यकृत्वेऽतं गुरुतरस्वस्वप्रतियोगिसामानाधिकरण्यनिवेशेनेतिचेन्न। वह्निमान् धूमादित्यादौ साध्यव्यापकतावच्छेदकप्रतियोगिवृत्तित्वाभावेनासंभवा
ताकवाच्यत्ववृत्तित्वविशिष्टवाच्यत्वाभावस्य गगनाभावयत्किंचिद्धेत्वधिकरणान्यत्वे तदुभयाभावस्य च प्रतियोगिवृत्तित्वाभावेनासंभवा
पत्तेरिति। यदपि यत्समानाधिकरणाः साध्यव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः दैशिकविशेषणतयोभयवृत्तयस्तत्त्व॰
मित्येवास्तु लक्षणं स्वस्वप्रतियोगिसामानाधिकरण्यांऽतभावे गौरवात्। हेतुसमानाधिकरणस्य तत्तद्योगोलकान्यत्वाभावस्यैव दैशिकविशे
षणतयो भयवृत्तित्वविरहाद्धूमवान् वन्हेरित्यादावतिव्याप्तिविरहान्नमन्दम्॥ ॥हेतुसमानाधिकरणस्य वह्निसंयोगात्मकाभाव
स्य दैशिकविशेषणतयोभयवृत्तित्वविरहाद्वह्निमान् धूमादित्यादावव्याप्तिप्रसंगात्। न च भावभिन्नस्यैव हेतुसमानाधिकरणाभावस्य प्र॰
वेशेनेष दोषः॥ तद्घटभिन्नघटत्वादित्यादावतिव्याप्त्यापत्तेः। तद्घटभिन्नत्वाद्यभावस्य तद्घटत्वादिस्वरूपत्वेन भावत्वात्। घटत्वादिनात
द्घटभिन्नत्वाद्यभावस्योभयवृत्तित्वादलं पल्लवेनेति जगदीशः॥ अत्र कल्पे यावत्पदानुक्तौ धूमवान् वन्हेरित्यादावतिव्याप्तिः। इदानींतु
यावदन्तर्गतस्य तत्तद्योगोलकान्यत्वाभावस्य तदीयरूपध्वंसवदन्यत्वाभावस्य च। विशेषणतयोभयवृत्तित्वाभावान्नातिव्याप्तिः। य
त्समानाधिकरणादलानुक्तौ वन्हिमान् धूमादित्यादौ तद्घटीयरूपध्वंसवदन्यत्वाभावमादायाव्याप्तिः। व्यापकत्वदलानुक्तौ तत्पूर्वतीय॰
रूपध्वंसात्मकाभावमादाय तत्रैवाव्याप्तिः। दैशिकविशेषणतयेत्यनुक्तौ तत्तद्योगोलकीयरूपध्वंसात्मकाभावस्यापि कालिकादिसंबधेन
उभयवृत्तित्वाद्व्यभिचारिण्यतिव्याप्तिरिति। न चात्र कल्पे संयोगाद्यात्मकाभावमादाय सर्वत्रासंभवसंभवे तमपहाय कथं वह्निमान् धू
मादित्यादावव्याप्तिरित्युक्तं जगदीशेनेति वाच्यं। प्रमेयवान् घटभेदत्वादित्यादौ लक्षणगमनात्। विषयतादेर्वृत्त्यनियामकत्वमते घटभे॰
दइत्याकारकयत्किंचिज्ज्ञानाभावस्यापि हेत्वधिकरणवृत्तित्वविरहेण तमादायाव्याप्त्यसंभवात्। अथात्र तत्पर्वतवृत्तिरूपध्वंसात्म॰

ना॰व्य॰ काभावस्यापि तादृशयावदन्तर्गतस्य विशेषणतयोभयवृत्तित्वविरहेण वन्हिमान् धूमादित्यादावव्याप्तिरिति चेन्न। प्रतियोगिवैय्यधिक-
ग॰शं॰ रण्याघटितव्यापकत्वस्यानुसरणीयत्वादिति। अत्रेदं शंक्यते। तद्घटभिन्नं घटत्वादित्यादौ तद्घटवृत्तिरूपध्वंसप्रागभावात्मकाभावस्य या-
४ वदन्तर्गतस्य भावभिन्नस्य दैशिकविशेषतयोभयवृत्तित्वविरहान्नातिव्याप्तिरिति चेन्न। आदिपदेन तद्गुणभिन्नं गुणत्वादित्यादावति-
व्याप्तेरुक्तत्वात्। न च तथापि तद्रूपभेदगुणत्वप्रकारकप्रमाविशेष्यत्वैतदन्यतराभावस्य तादृशयावदन्तर्गतस्य भावभिन्नस्य विशेष-
णतयोभयवृत्तित्वविरहान्नातिव्याप्तिरिति वाच्यं। विषयत्वस्य ज्ञानासमानकालीनतया तादृशाभावस्याप्रसिद्धेः। न च तद्रूपभेदतत्क्षण-
वृत्तित्वैतदन्यतराभावस्य तत्क्षणविगमकालावच्छेदेन तद्रूपादौ सत्त्वेन प्रसिद्धतया तादृशयावदन्तर्गतस्य भावभिन्नस्य विशेषतयोभय-
वृत्तित्वविरहान्न तत्रातिव्याप्तिरिति वाच्यम्। तदभावस्य तत्क्षणवृत्तित्वाभावविशिष्टतद्रूपत्वस्वरूपत्वेन कल्पनीयतयाभावभिन्नत्वाभा-
वात्। अथात्र तद्घटवृत्तिरूपध्वंसात्मकाभावस्यापि कालिकादिसंबंधेन हेत्वधिकरणेवृत्तितया साध्यव्यापकतावच्छेदकप्रतियोगिताक-
स्य विशेषणतयोभयवृत्तित्वविरहाद्वह्निमान् धूमादित्यादावव्याप्तिरिति चेन्न। भावभिन्नपदेन विशेषणतया हेत्वधिकरणवृत्त्यभावस्य
लभ्यत्वात्तादृशाभावस्य विशेषणतया हेत्वधिकरणवृत्तित्वविरहेण लक्षणाघटकत्वात्। यदि च भावभिन्नपदेन विशेषणतया हेत्वधि-
करणविवक्षणे। तत्क्षणवृत्तित्वतद्रूपभेदैतदन्यतराभावस्य तद्रूपनिष्ठव्यधिकरणधर्मावच्छिन्नप्रतियोगित्वाभावाभावस्य च तादृश-
संबंधेन हेत्वधिकरणवृत्तितया न तमादाय प्रागुक्तातिव्याप्तिरिति विभाव्यते। तदा तत्पर्वतवृत्तिरूपध्वंसाभावविशिष्टवाच्यत्वाभावस्य
तादृशरूपध्वंसाभाववाच्यत्वोभयाभावस्य निरुक्तयावदन्तर्गतस्य भावभिन्नस्य च दैशिकविशेषणतयोभयवृत्तित्वाभावाद्वह्निमान् राम
धूमादित्यादावव्याप्तिरेवम् तत्कल्पे दोषामंतव्यः। यदि च विशिष्टाभावप्रतियोगित्वं वैशिष्ट्येउभयाभावस्य प्रतियोगित्वं च यद्भावप्र- ४

युक्तोभयाभावस्तस्मिन्नेवस्वीक्रियतेवैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नत्वंवासाध्यव्यापकतावच्छेदकप्रतियोगिताविशेषणंदीयते।त
दाएतन्मतेकोपिदोषोनास्तीतिनिपुणतरंविभावनीयम्।अत्रचसाध्यवन्निष्ठाभावःप्रतियोगिव्यधिकरणत्वेनविशेषणीयः।तेनसाध्यवन्मा
त्रएवसमवायित्वावच्छिन्नवाच्यत्वाभावप्रतियोगित्वेनघटाद्यभावस्यसत्वेपिनसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताका
भावस्याप्रसिद्धिः।इत्थंचतत्संबंधेनस्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकोयोयस्तदन्यत्वेसतितत्संबंधावच्छि
न्नाधेयतावच्छेदकत्वरूपतत्संबंधेनसाध्यव्यापकतावच्छेदकमितिजगदीशेनोक्तम्।अथात्रयद्यत्प्रतियोगितावच्छिन्नानधिकरणं
साध्यवत्तत्तत्प्रतियोगिताभिन्नत्वसाध्यव्यापकतावच्छेदकत्वमित्यस्यैवसम्यक्त्वेसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वपर्यंता
नुधावनव्यर्थमितिचेन्न।व्यापकतावच्छेदकत्वपदेन अधिकरणनिष्ठाभावप्रतियोगितानवच्छेदकत्वस्यैवप्रतीयमानत्वेनतदनुक्तौव्यापक
तावच्छेदकत्वपदस्यपारिभाषिकत्वापत्त्याजगदीशेनतत्परित्यक्तत्वात्।व्यापकतापदस्यपारिभाषिकत्व [illegible]लाघवमात्रानुरोधेनभट्टा
चार्येणतथैवोक्तत्वाच्च।अथात्रकल्पेप्रतियोगिव्यधिकरणत्वेनाभावस्यविशेषणीयत्वेपिसमवायित्वेनवाच्यत्वाभावप्रतियोग्यधिकरण
त्वेनघटादिभेदस्यसाध्याधिकरणेसत्वेनपुनरप्रसिद्धितादवस्थ्यमितिचेन्न।साध्याधिकरणवृत्तितादृशाभावप्रतियोगितावच्छेदिकायायाप्र
तियोगितातदन्यत्वस्यव्यापकतावच्छेदकत्वपदेनविवक्षितत्वात्।साध्याधिकरणवृत्तित्वंच स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्वसं
बंधेन।अवच्छेदकताचस्वावच्छिन्ननिरूपकताकाधिकरणत्वसंबंधेनस्वंसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वेनाभिमताप्रतियोगि
ता।नचतथापिस्वावच्छिन्ननिरूपकताधिकरणत्वसंबंधेनसमवायित्वेनवाच्यत्वाभावप्रतियोगित्ववत्घटादिभेदस्यापिसंसर्गतयातादृश
प्रतियोगित्वस्यापिसाध्याधिकरणवृत्तित्वेनपुनरप्रसिद्धिस्तादवस्थ्यमितिवाच्यं।प्रतियोगितायाअन्यूनानतिरिक्तवृत्तिधर्मावच्छिन्नप्रतियो

गिताकभेदस्यैवसंसर्गत्वाभ्युपगमात्। लब्धार्थिकासतीरूढिरित्यादि पङ्क्तिव्याख्यानावसरे पङ्कजशब्दार्थविचारप्रस्तावे एतस्यस्वयमेवोक्तत्वाच्च
।अथात्रलघुरूपसमनियतगुरुधर्मस्यप्रतियोगितावच्छेदकत्वास्वीकर्तृनये घटाद्यभावप्रतियोगित्वावच्छिन्नप्रतियोगिताकाभावस्यप्रति
योगितावच्छेदकत्वं। घटत्वावच्छिन्नप्रतियोगित्वापेक्षयालघुनि घटत्वे एवस्वीकरणीयम्। तथाचघटाद्यभावप्रतियोगित्वस्यसाध्यवन्निष्ठा
भावप्रतियोगितावच्छेदकभिन्नत्वेनघटाद्यभावस्यसाध्यव्यापकतावच्छेदकप्रतियोगिताकतयायावदन्तर्गतस्यस्वविशिष्टहेत्वधिकरणावच्छे
देनप्रतियोग्यसामानाधिकरण्यादसंभवइतिचेन्न। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्यानुसरणीयत्वात्। तथाचयत्किंचित्साध्याधिकरणा
वृत्तिस्वविशिष्टसामान्यिकायायाप्रतियोगितातदन्यत्वंसाध्यव्यापकतावच्छेदकत्वमितिसमुदितार्थः। इत्थंचघटाद्यभावप्रतियोगिताविशि
ष्टसामान्यस्यैवसाध्याधिकरणावृत्तितयातदन्यत्वस्यघटाद्यभावप्रतियोगित्वेऽसत्त्वेन घटाद्यभावस्यलक्षणाघटकत्वमितिसर्वंसुस्थितम्। व
स्तुतःसाध्यवन्निष्ठाभावस्यतत्संबंधावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वमेवतत्संबन्धेनसाध्यव्यापकतावच्छेदक
त्वंवाच्यम्। तत्रसाध्यवन्निष्ठत्वमभावस्यस्वरूपसंबं धेनग्राह्यम्। तेनस्पंदःकालत्वादित्यादौस्पंदत्वाभावस्यापिकालिकसंबंधेनसाध्यव
तिवृत्त्यायावदन्तर्गत त्वेनवाच्यत्वाद्यभावस्यचतादृशस्यप्रतियोगिसामानाधिकरण्येऽपिनक्षतिः। इत्थंचजातिसामान्याभावादेरपिवन्ह्यादि
व्यापकतयातत्प्रतियोगिकस्यजात्यादिस्वरूपस्यहेतुसमानाधिकरणाभावस्यप्रतियोगिसामानाधिकरण्याभावादसंभवापत्तेरतोऽभावाः
इत्युक्तम्। भावभिन्नाइतिचतदर्थइतिजगदीशेनोक्तम्। नचप्रमेयवान् घटाभावत्वादित्यादौजातिस्वरूपाभावस्यहेत्वधिकरणवृत्तित्वाभा
वेनलक्षणाघटकतयाऽभावान्तरमादायलक्षणसमन्वयात्। कथमसंभ वापत्तिरित्युक्तम्। जगदीशेनअव्याप्त्यापत्तिरित्य स्यैववक्तुमु
चितत्वात् इतिवाच्यम् विषयतादेर्वृत्तिनियामकत्वमतेघटाभावानुयोगिकविषयतासंबंधेननित्यज्ञानाभावाभावस्याव्यभिचारित्वादिसंबं

धस्यवृत्तिनियामकत्वमतेजातिसामान्याभावाभावस्यापि तादृशसंबंधेन हेत्वधिकरणवृत्तितयानमादायोक्तस्थलेपिलक्षण गमनासंभवात्।
अथघटत्वेन जातिसामान्याभावाभावस्यातिरिक्तस्यतादृशतया तस्यच स्वविशिष्टहेत्वधिकरणावच्छेदेनप्रतियोगिसामानाधि[illegible]भावास्तु न
रसंभवापत्तिरिति चेन्न। भावभिन्नत्वपदेन साध्यवद्वृत्तिभावप्रतियोगिप्रतियोगिकान्यत्वस्य विवक्षितत्वात्। अतएवमनोन्यत्वाद्यभावस्यात
थात्वान्नातिप्रसंग इति दीधितीकारोक्तमपि संगच्छते। साध्यवद्वृत्तिभावरूपाभावप्रतियोगी प्रतियोगी यस्येति विग्रहः भावप्रतियोगिप्र
तियोगिकान्यत्वोक्तौ मनस्त्वात्मकस्य मनोभेदाभावस्य तद्विरहात्। पुनः दीधितिकारोक्तासंगतिरत उक्तं साध्यवद्वृत्तीति॥ प्रतियोगिप्रति
योगिकान्यत्वोक्तौ च तादृशाभावाप्रसिद्धिरत उक्तं भावइति। ननु साध्यवद्वृत्तिभावप्रतियोगिप्रतियोगिकान्यत्वरूपभावभिन्नत्वनिवेशेपि पृथि
वीत्वमनस्त्वएतदन्यतरस्वरूपस्यान्यतराभावाभावस्य साध्यवद्वृत्तियत्पृथिवीत्वं तत्प्रतियोगिप्रतियोगिकत्वेन मनस्त्वस्वरूपाभावस्य भाव
भिन्नत्वविरहात् दीधितिकारोक्तासंगतितादवस्थ्यमिति। नच घटत्वेन मनोन्यत्वाभाव एव तादृशभावभिन्न इति वाच्यं। तस्यापि पृथिवीत्वपूर्वे
क्षणवृत्तित्वविशिष्टघटत्वेमनोन्यत्वाभाव एतदन्यतरस्वरूपाभावमादाय साध्यवद्वृत्तिभावप्रतियोगिप्रतियोगिकत्वादिति चेन्न साध्यवद्वृत्ति
भावप्रतियोगिनिष्ठं यत्प्रतियोगित्वं तदन्यप्रतियोगिताको योभावः स एव भावभिन्नः। अभावइत्य थेस्यैव पर्यवसितत्वादिति साध्यवद्वृत्तिभावश्च
साध्यव्यापकताघटकसंबंधावच्छिन्नप्रतियोगिताको बोध्यः। तेन घटत्वेन वाच्यत्वाद्यभावस्य पर्वतभिन्नभेदस्य पर्वतत्वस्वरूपत्वेन साध्यवद्वृ
त्तिभावत्वात्तत्प्रतियोगिप्रतियोगिकत्वेपि न लक्षणाघटकत्वं। वस्तुतो भावभिन्नपदेन साध्यवद्वृत्तिभावीयप्रतियोगितावच्छेदकप्रतियो
गिताकान्यत्वस्य विवक्षणान्नकोपि दोष इत्याहुः। तच्चिन्त्यम्। साध्यवद्वृत्तित्वं यदि येनकेनापि संबंधेनोच्यते तदा मनस्त्वस्वरूपस्य मनोभेदाभा
वस्य कालिकादिसंबंधेन साध्यवद्वृत्तित्वेन मनोन्यत्वाद्यभावस्यातथात्वान्नातिव्याप्तिप्रसंग इति दीधितिकारोक्तासंगतिः। रूपभिन्नं गुणत्वा

जा॰व्य॰ दित्यादौ रूपत्वस्वरूपाभावस्यातथात्वादतिव्याप्तिश्च। यदि स्वरूपसंबंधेन साध्यवद्वृत्तित्वं विवक्ष्यते। तदा जातिसामान्याभावाभावमादाय पुनर
का॰शं॰ संभवतादवस्थ्यम्। तस्मात् स्वप्रतियोगिमत्ताग्रहविरोधिताघटकसंबंधेन साध्यवद्वृत्तित्वं वाच्यं। तथा सति मनस्त्वस्य मनोन्यत्वाभावीयप्रति-
६ योगिमत्ताग्रहविरोधिताघटकसमवायसंबंधेन साध्यवद्वृत्तिविरहेण मनोन्यत्वाभावस्य निरुक्तभावभिन्नत्वमस्त्येवेति नासंगतिः। जातिस्व-
रूपाभावस्य स्वीयप्रतियोगिमत्ताग्रहविरोधिताघटकसंबन्धेन साध्यवद्वृत्तितया जातिसामान्याभावाभावस्य लक्षणाघटकत्वमिति बोध्यम्।
एवं च व्यापकताघटकीभूतसाध्यवन्निष्ठत्वमेव। स्वप्रतियोगिमत्ताग्रहविरोधिताघटकसंबंधेन वाच्यम्। तावतैव जात्यां स्वरूपाभावस्य ल-
क्षणाघटकतयाऽसंभववारणसंभवात्। भावभिन्नत्वदलं व्यर्थमिति पूर्वपक्षो दुर्वार इति सुधीभिर्विभावनीयम्॥ केचित्तु स्वाभावत्वं स्वप्रतियोगि-
त्वमिति समानाधिकरणधर्मावच्छिन्नप्रतियोगित्वस्य प्रतियोगितावच्छेदकस्वरूपत्वेन जातिसामान्याभावत्वावच्छिन्नप्रतियोगित्वावच्छिन्ना-
भावस्य जातिस्वरूपत्वेपि घटत्वेन जातिसामान्याभावाभावीयप्रतियोगित्वस्याऽतिरिक्ततया तदवच्छिन्नाभावस्य जात्यनात्मकतया घटत्वे-
न जातिसामान्याभावाभावस्य साध्यव्यापकतावच्छेदकप्रतियोगिकत्वाभावेन लक्षणाघटकत्वात्तमादायनासंभव इति प्राहुः। तदपि न मनोरम-
म्। एवमपि द्वितीयलक्षणे जात्यभावत्वेन घटाद्यभावमादायासंभवस्य दुर्वारत्वादिति ध्येयम्। परे तु समनियताभावानामैक्यमते घटत्वादिना
जातिसामान्याभावाभावस्यैव घटत्वादिना वाच्यत्वाद्यभावस्वरूपतया तस्य च वाच्यत्वादिरूपप्रतियोगिसामानाधिकरण्यान्नासंभवशंका-
प्यस्ति। भावभिन्नत्वं साध्यवद्वृत्तिभावात्मत्वं। किं वा यथाश्रुतमेवमनोन्यत्वाद्यभाव इत्याद्युत्तरग्रंथस्तु समनियताभावानामनैक्यमते घट-
त्वेन घटनोन्यत्वाभावमादाय संगमनीयः॥ न चैवमपि जातित्वादिविशिष्टजातिसामान्याभावाभावमादायासंभवो दुर्वार एवेति वाच्यम्। तादृशाभा- राम
वस्य वक्ष्यमाणस्वन्यूनवृत्तिधर्मानवच्छिन्नत्वविशेषणेनैव वारणीयत्वादित्याहुः। यत्तु साध्यवद्वृत्त्यभावप्रतियोगितावच्छेदकप्रतियोगिताका- ६

इत्यर्थ इति तन्मन्दम्। केवलान्वयिसाध्यकसद्धेतौ तादृशप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तेः। गगनस्वरूपाभावस्य तादृशत्वेऽपि तस्य हेतुसामानाधि
करण्यासंभवादिति जागदीशी। अथात्र घटत्वेन गगनाभावाभावीयप्रतियोगित्वावच्छिन्नाभावस्य गगनस्वरूपतया साध्यवद्वृत्तित्वेन साधनस
मानाधिकरणस्य साध्यवद्वृत्त्यभावप्रतियोगितावच्छेदकप्रतियोगिताकस्य घटत्वेन गगनाभावाभावस्य प्रतियोगिसमानाधिकरणतया केवला
न्वयिन्यपि लक्षणगमनसंभवादेतद्दूषणमयुक्तमिति चेन्न॥ स्वाभावत्वं स्वप्रतियोगित्वमिति मते समानाधिकरणधर्मावच्छिन्नप्रतियोगित्वस्य प्रति
योगितावच्छेदकस्वरूपत्वेन गगनाभावत्वावच्छिन्नप्रतियोगित्वावच्छिन्नाभावस्य गगनस्वरूपत्वस्वीकारेऽपि घटत्वेन गगनाभावाभावीयप्र
तियोगित्वस्यातिरिक्ततया तदवच्छिन्नाभावस्य गगनस्वरूपत्वस्वीकारेण तस्यैवासिद्धतया घटत्वेन गगनाभावाभावीयप्रतियोगित्वस्य सा
ध्यवद्वृत्त्यभावप्रतियोगितावच्छेदकत्वविरहादिति ध्येयम्। ननु साध्यतावच्छेदकव्यापकप्रतियोगिताकयावदभावोक्त्यैव वाच्यत्वाद्यभावमा
दाय उक्तातिप्रसंगव्युदाससंभवात्। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावानां यावत्त्वोपादाने गौरवग्रस्तमत आ
ह। अत एवेति इति जगदीशेनोक्तम्। तस्यायमाशयः साध्यतावच्छेदकसंबंधावच्छिन्नतादृशप्रतियोगिताका यावन्तोऽभावाः स्वप्रतियोगिता
वच्छेदकसंबंधेन स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणास्तत्त्वमिति समुदितार्थः। संबंधान्तरावच्छिन्नाभावमादायासंभव
वारणाय साध्यतावच्छेदकसंबंधावच्छिन्नेत्युक्तं। कालिकादिसंबंधेन प्रतियोगिसामानाधिकरण्याद्धूमवान्वह्नेरित्यादावतिव्याप्तिरत स्वप्रति
योगितावच्छेदकसंबंधेनेति। न च साध्यतावच्छेदकसंबंधेन प्रतियोगिसामानाधिकरण्यं प्रतियोगित्वं तु यथाकथंचित्संबन्धावच्छिन्नं ग्राह्य
। तत एव नासंभवादिसंभवानापीति वाच्यम्। संबंधान्तरावच्छिन्नतादृशप्रतियोगिताकाभावमादाय लक्षणगमनसंभवे प्रतियोग्यवृत्तित्वस्य त्या
ज्यत्वानत्यतिप्रसंगात्। यदपि ननु यादृशाभावप्रतियोगिताया व्यापकसाध्यतावच्छेदकं तादृशः कश्चिदभावो यद्धर्मावच्छिन्नाधिकरणावच्छे

गा॰ व्य॰ देनप्रतियोगिसमानाधिकरणस्तद्धर्मवत्त्वं व्याप्तिरित्युक्तौ च वाच्यत्वाद्यभावमादायातिव्याप्तिवारणसंभवात्। यावत्त्वलक्षणं गौरवग्रस्तमत आह
का॰ श॰ ।अत एवेति। तदप्यसंगतम्। प्रतियोगितामात्रस्यैव प्रत्येकपर्यवसितत्वेन वह्निधूमोभयत्वादेस्तद्व्यापकत्वासंभवाद्वह्निधूमोभयवान् धूमादित्या
७ दावव्याप्तिभयेन तादृशनिरुक्तेः शंकितुमशक्यत्वात् इति जगदीशः। अत्रेदं शंकते। उभयत्वस्य पर्याप्तिसंबंधेन एकत्वावच्छेदेनाभावसत्त्वेपि
प्रतियोगिवैयधिकरण्यघटितव्यापकत्वमस्त्येवेति मैवम्। प्रतियोगिवैयधिकरण्यं निवेश्य वह्निधूमोभयवान् धूमादित्यादावव्याप्तिवारणसंभ
वेपि गुणान्यत्वविशिष्टसत्तावत्त्वान् द्रव्यत्वादित्यादावतिव्याप्तेः। सत्तावदभावीयप्रतियोगित्वाधिकरणे गुणे सत्त्वानतिरिक्तसाध्यतावच्छेदकी॰
भूतविशिष्टसत्त्वाधिकरणत्वसत्त्वेन सत्तावदभावस्य लक्षणघटकत्वे न तस्य प्रतियोगिसामानाधिकरण्यसत्त्वादिति न च तत्रातिव्याप्तिः। भू
तत्वभूतत्वोभयवान् मूर्तत्वादित्यादिवत्स्वीकरणीयेति वाच्यं। जगदीशमते तत्रातिव्याप्त्यसंभवेन भवन्मते तत्स्वीकारेऽतीवसंदर्भविरोधा
पत्तेः न च तथापि साध्यतावच्छेदकतावच्छेदकावच्छिन्नानधिकरणत्वव्यापकताघटकं वाच्यं सत्तावदभावीयप्रतियोगिनि गुणे साध्यताव॰
च्छेदकतावच्छेदकीभूतविशिष्टसत्तात्वावच्छिन्नानधिकरणत्वेन विशिष्टसत्त्वस्य सत्तावदभावीयप्रतियोगित्वाव्यापकत्वात्। सत्तावदभावीय
स्य लक्षणाघटकत्वेन न तत्रातिव्याप्तिरिति वाच्यं। तथा सति स्वरूपतः साध्यतावच्छेदकस्थले वह्निमान् धूमादित्यादावव्याप्तिः तत्र साध्यतावच्छेद
कतावच्छेदकस्याभावादिति ध्येयम्। वस्तुतस्तु यथाश्रुताभिप्रायेण ग्रन्थकृता दूषितत्वेन प्रतियोगिवैयधिकरण्यनिवेशस्य तत्राव्याप्तिवारणं न क्षति
मावहतीति भावः। नव्यास्तु साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नसाध्यनिष्ठप्रतियोगिताको यः कश्चिदभावो यदधिकरणावच्छेदेन सा
ध्यतावच्छेदकसंबंधेन तादृशप्रतियोगित्वाश्रयसमानाधिकरणस्तत्त्वमिति जगदीशेनोक्तम्। अत्र च वह्निधूमोभयत्वावच्छिन्नाभावमादाय राम॰
धूमवान् वह्नेरित्यादावतिव्याप्तिवारणायानवच्छिन्नांतम्। साध्यनिष्ठपदमपि तदर्थमपि॥ धूमवान् वह्नेरित्यादौ कालिकादिसंबंधेन धूमाद्य ७०

भावस्यहेत्वधिकरणावच्छेदेनप्रतियोगिसामानाधिकरण्यादतिव्याप्तिरतः साध्यतावच्छेदकसंबंधेनेति। अत्रसाध्यतावच्छेदकसंबंधेनप्रतियोगि॰सामानाधिकरण्योक्तौप्रतियोगितायांसम्बंधावच्छिन्नत्वंननिवेश्यते प्रयोजनाभावात्। तथाचवन्हिमान्धूमादित्यादौव्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकवह्न्याद्यभावमादायलक्षणगमनसंभवेपिप्रमेयवान्वाच्यत्वादित्यादौगगनादिरूपेणप्रमेयाद्यभावरूपव्यधिकरणधर्मावच्छिन्नाभावंविनालक्षणगमनासंभवात्। नप्रतियोग्यवृत्तिश्चेत्यादिग्रंथानुस्थितिप्रसंगः। अत्रचलक्षणेतादृशपदेनसाध्यनिष्ठप्रतियोगित्वमात्रंपरामृश्यते॥ ननु साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नसाध्यनिष्ठप्रतियोगित्वपर्यन्तंतथासतियः कश्चिदभावोयदधिकरणावच्छेदेनसाध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नसाध्यनिष्ठप्रतियोगित्वाप्रसमानाधिकरणइत्यस्यैवसम्यक्त्वेसाध्यनिष्ठप्रतियोगिताकत्वपर्यंतमभावविशेषणंव्यर्थम्। धूमवान्वन्हेरित्यादावतिव्याप्त्यभावात्। नाव न्मात्रोक्तौचव्यधिकरणधर्मावच्छिन्नाभावंविनालक्षणगमनसंभवेप्रतियोग्यवृत्तिश्चेत्यादिमूलानवतारप्रसंगः। अथात्रधर्मानवच्छिन्नत्वमेवोच्यतां किंसाध्यतावच्छेदकातिरिक्तत्वस्यधर्मविशेषणत्वेनेति। सर्वत्रैवगगनत्वेनसाध्याभावस्यलक्षणघटकत्वादव्याप्त्यसंभवादितिचेन्न। अखंडाभावघटकतयासार्थक्यात्॥ नचैवमप्यनतिप्र[illegible]योजनकतयाकथमेतत्पर्यन्तंविशेषणमितिवाच्यम्। भूतत्वमूर्त्तत्वोभयत्वावच्छिन्नाभावस्येत्यादिदीधितिसंगमनार्थकत्वात्। केचित्तु धर्मानव[illegible]न्नत्वमात्रनिवेशनेप्रतियोगितामात्रस्यैवसंबंधावच्छिन्नत्वेनवृत्तिमद्रूपधर्मानवच्छिन्नप्रतियोगित्वाप्रसिद्ध्यासंभवः स्यादतउक्तमतिरिक्तंधर्म[illegible]णम्। नचधर्मविधयाधर्मेनिष्ठावच्छेदकत्वानिरूपकत्वनिवेशेनैवासंभवाभावात् तद्वारकमतिरिक्तान्तविशेषणंव्यर्थमितिवाच्यं। [illegible]वेशवैयर्थ्याभावात् व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकतस्यप्रतियोग्यंशेप्रकारीभूतधर्मेपिकेचिदित्यादिनाभट्टाचार्यैः स्वीकृततयातन्मतेऽसंभवस्तादवस्॰स्थ्याच्चेतिआहुः। नचैवमपिसाध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नत्वमपहायसाध्यतावच्छेदकावच्छिन्नत्वमेवनिवेश्यतां। सर्वे

त्र्व्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकाभावमादायलक्षणगमनसंभवादितिवाच्यम्। प्रमेयवान् वाच्यत्वादित्यादावव्याप्तिः। प्रमेयत्वावच्छिन्न
प्रतियोगिताया व्यधिकरणसंबंधाप्रसिद्ध्या प्रमेयत्वावच्छिन्नाभावमात्रस्यैव हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावात्। न च व्यधिक
रणसंबंधावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावमादायैव प्रमेयवान् वाच्यत्वादित्यादौ लक्षणगमनसंभव इति वाच्यं। कालिकसंबंधेन धूमत्ववि॰
शिष्टाभावमादाय धूमवान् वन्हेरित्यादौ अतिव्याप्तिवारणार्थं साध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकत्वस्यैव निवेश्यत्वात्। न च विरुद्धोभ
यसंबंधावच्छिन्नाभावमादायैव प्रमेयवान् वाच्यत्वादित्यादौ लक्षणसमन्वय इति वाच्यं। विरुद्धोभयत्वस्य संसर्गतावच्छेदकतानभ्युपगमात्। विशिष्ट
धीनियामकतावच्छेदकस्यैव संसर्गतावच्छेदकत्वात्। अभ्युपगमे तु विरुद्धोभयसंबंधेन प्रमेयत्वावच्छिन्नाभावमादाय व्यधिकरणधर्मावच्छिन्नाभावं
विनापि लक्षणगमनसंभवे प्रतियोगिवृत्तिश्चेत्यादिमूलानुत्थितिप्रसंगः। केचित्तु गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेन लघुरूपसमनियतगुरुरूपेण
साध्यतायामव्याप्तिभिया साध्यतावच्छेदकावच्छिन्नत्वस्य निवेशासंभव इत्याहुः। येन संबंधेन व्यापकत्वं तेन संबंधेन प्रतियोग्यधिकरणवृत्तित्वं वक्त
व्यमन्यथा पृथिवी महाकालकपालान्यतरत्वादित्यत्र पृथिवीत्वाद्यभावस्य कालिकसंबंधेन पृथिवीरूपप्रतियोग्यधिकरणे महाकाले वृत्तेरतिव्याप्त्या
पत्तेः कालिकसंबंधेन पृथिवीत्वस्य व्यापकत्वं न घट तेनित्यपृथिव्यां व्यभिचारात्। अतो न तत्संबंधमादायातिव्याप्तिसंभावना॥ यदि च स्पन्दो महा
कालत्वादित्यादावतिव्याप्तिः स्पन्दमात्रस्य जन्यतया कालिकसंबंधस्यापि स्पंदत्वव्यापकतावच्छेदकत्वसंभवेन तेन संबंधेन स्पंदत्वरूपप्रतियोग्य
धिकरणे महाकाले स्पंदत्वाद्यभावस्य सत्वात्। न च स्पंद इत्याकारकयत्किंचिद्बोधव्यक्तेर्विषयतासंबंधेन स्पंदत्वव्यापकत्वात्। यावदंतर्गतस्य तदभाव
स्यैव साध्यव्यापकताघटकविषयतासंबंधेन हेत्वधिकरणे महाकाले प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिः। न हि तादृशबोधव्यक्तेः कालिक॰
संबंधेनापि स्पन्दत्वव्यापकत्वं भाविभूतस्पन्देषु व्यभिचारादिति वाच्यं विषयतायाज्ञानसमानकालीनतया तद्बुद्धिव्यक्त्यभावदशायामपि स्पंदत्ववतिवि

षयतासंबंधेनतद्बुद्धिव्यक्त्यभावसत्वादितिजगदीशेनोक्तम्। अत्रायंपूर्वपक्षः। प्रतियोगिवैयधिकरण्याघटितव्यापकतायांसाध्याधिकरणेस्पंदेस्पन्दत्वा
नधिकरणदेशावच्छेदेनस्पन्दत्वाभावीयप्रतियोगिताश्रयस्पन्दत्वस्यकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावसत्वात् साध्यवन्निष्ठाभावप्र
तियोगितावच्छेदकत्वस्यैवस्पंदत्वाभावीयप्रतियोगितायांसत्वादितिकालिकोनसाध्यव्यापकताघटकसंबंधः। कथंतत्संबन्धमादायस्पन्दकाल
त्वादित्यादावतिव्याप्तिः। प्रतियोगिवैयधिकरण्यघटितव्यापकताकल्पेचयावदन्तर्गतस्यस्पंदइत्याकारकयत्किंचिज्जन्यज्ञानाभावस्यव्यापक
ताघटकविषयतासंबंधेनहेत्वधिकरणावच्छेदेनप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरिति। अत्रेदंसमाधानं। समनियताभावानामैक्य
मते। स्पंन्दानुयोगिकस्वरूपसंबंधावच्छिन्नप्रतियोगिताकवाच्यत्वाद्यभावस्यसमवायसंबंधावच्छिन्नप्रतियोगिताक स्पन्दत्वाभावाभिन्न
तयासाध्यवन्निष्ठकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेदकस्पंदानुयोगिकस्वरूपसंबंधावच्छिन्नवाच्यत्वनिष्ठप्र
तियोगिताकत्वस्यसमवायसंबंधावच्छिन्नप्रतियोगिताकस्पंदत्वाभावेपिसत्वात्। कालिकस्यापिव्यापकताघटकसंसर्गतयातद्ग्रंथसंगतेरिति
। प्रमेयमित्याकारकयत्किंचिज्जन्यज्ञानाभावमादायव्यधिकरणधर्मावच्छिन्नाभावव्यतिरेकेणापिलक्षणगमनात्। प्रतियोगिवैयधिकरण्याघ
टितव्यापकत्वस्यैवानुसरणीयतयास्पंदइत्याकारकयत्किंचिज्जन्यज्ञानाभावस्यप्रतियोगिवैयधिकरण्यघटितस्पन्दत्वव्यापकतावच्छेदक
त्वसंभवेपिनानुपपत्तिरितिध्येयम्। वस्तुतस्तु एतदस्वरसेनैव किंचेत्यादिनादोषान्तरस्यसंबंधत्रयस्यैक्यविवक्षणेबीजत्वमुक्तमितिभाव
। यत्तुघटादावुत्पत्तिकालावच्छेदेनरूपसामान्याभावस्यप्रत्यक्षमेवसंभवति। तदानींचक्षुःसंयुक्तविशेषणतायाअसत्वेपिद्रव्यसमवेतवृत्य
भावप्रत्यक्षहेतोः। चक्षुःसंयुक्तसमवेतवृत्यभावविशेषणतायासत्वेनसंनिकर्षसंभवादितितत्तुच्छम्। चक्षुःसंयुक्तसमवेतद्व्यणुकविशेषण
तयारूपाद्यभावचाक्षुषापत्त्याचक्षुःसंयुक्तयोग्यसमवेतविशेषणतयाएवाभावग्राहकत्वेनद्रव्यान्यद्रव्यसमवेतवृत्यभावचाक्षुषत्वस्यैवजन्य

तावच्छेदकत्वात्। अन्यथात्रसरेणुवृत्त्यभावचाक्षुषेव्यभिचारापत्तेरितिध्येयमितिजगदीशः। अथात्रचक्षुःसंयुक्तसमवेतद्व्यणुकविशेषणतयारूपा
द्यभावचाक्षुषापत्तेर्वारणायकारणतावच्छेदककोटौसमवेतांशे योग्यत्वमेवनिवेशनीयम्। तेनकार्यतावच्छेदककोटौसमवेतांशेद्रव्यान्यत्ववि
शेषणव्यतिरेकेणापित्रसरेणुवृत्त्यभावचाक्षुषेव्यभिचारासंभवात्। कार्यतावच्छेदककोटौद्रव्यान्यत्वविशेषणनिवेशस्यघटादावुत्पत्तिकाला
वच्छेदेनरूपाभावचाक्षुषवारणंजगदीशस्यानुचितमितिचेन्न। परमाणौचक्षुःसंयोगदशायांद्व्यणुत्वादौरूपसामान्याभावचाक्षुषापत्तेः। चक्षुः
संयुक्तसमवेतयोग्यविशेषणतायास्तदानीमपिद्व्यणुत्वादौसत्वादिति। उक्तापत्तिवारणायसंयुक्तांशेयोग्यत्वनिवेशावश्यकत्वेऽथसंगतेऽप्ये
वंचक्षुःसंयुक्तसमवेतांशेपियोग्यत्वंनिवेशनीयम्। अन्यथाघटनिष्ठगुरुत्ववृत्त्यभावचाक्षुषापत्ते स्तथाच गुरुत्वेयोग्यत्वाभावान्न तथापत्तिरिति। ननु
योग्यचक्षुःसंयुक्तसमवेतवृत्त्यभावचाक्षुषत्वस्यैवकार्यतावच्छेदकत्वंवक्तव्यं। तावतैनव्यभिचारः। यद्वोत्पत्तिकालेघटादौरूपाभावचाक्षुषा
नुपपत्तिरितिचेन्न एतदस्वरसेन्नैपरकल्पानुसरणात्। वस्तुतएतादृशकार्यकारणभावकल्पनेपित्र[illegible]वृत्त्यभावचाक्षुषोत्पत्त्यर्थं द्रव्यवृत्त्यभा
वचाक्षुषत्वेनचक्षुःसंयुक्तयोग्यविशेषणतात्वेनचकार्यकारणभावस्यापिकल्पनीयतयाद्रव्यवृत्त्यभावचाक्षुषत्वावच्छिन्नस्यतस्यकारणविरहेणै
व। नघटादावुत्पत्तिकालावच्छेदेनाभावचाक्षुषोत्पत्तिसंभवइत्यवधेयम्। ननुधूमाद्यभावनिष्ठाजलादिवृत्तित्व विशिष्टगोत्वाद्यभावस्याभावो
धूमाद्यभावएवाभावप्रतियोगिकस्याभावाधिकरणकाभावस्याधिकरणस्वरूपत्वात्तथाच धूमादौसाध्येवन्ह्यादिहेतावतिव्याप्तिःधूमाद्यभावस्य
हेत्वधिकरणावच्छेदेनगोत्वाभावरूपप्रतियोगिसामानाधिकरण्यादतआह जलादिवृत्तीतिजगदीशः। ननुधूमवान्वन्हेरित्यत्रयावदन्तर्गतस्यभा
वस्वरूपस्यायोगोलकान्यत्वाभावस्यप्रतियोगिसामानाधिकरण्याभावेनातिव्याप्तिविरहान्नतत्संगतिः। अभावाधिकरणस्यैवाधिकरणस्वरूपतया
ऽयोगोलकत्वादिवृत्तेः जलादिवृत्तित्वविशिष्टगोत्वाद्यभावाभावस्यायोगोलकत्वानात्मकत्वात्। मैवंगगनाभावभिन्नप्रमेयत्वादित्यादावतिव्याप्तिः॥

यावदन्तर्गतस्यगगनाभावभेदाभावस्यापितादात्म्येनगगनाभावात्मकतयातद्वृत्तेर्जलादिवृत्तित्वविशिष्टगोत्वाभावाभावस्यतदात्मकतयातत्प्र
तियोगिनागोत्वाभावेनसमंसामानाधिकरण्यादितिध्येयं।यावत्पदस्यफलतःप्रतियोगिताविशेषणत्वेनसाध्यव्यापकतावच्छेदकीभूतयद्यत्प्र
तियोगिताकोऽभावः स्वविशिष्टहेत्वधिकरणावच्छेदेनतत्रतत्तत्प्रतियोगिताश्रयसामानाधिकरण्यंविवक्षितं।नचैवंयत्समानाधिकरणादृत्यस्यवै
यर्थ्यमितिवाच्यं।आत्मत्वसामान्याभावीयप्रतियोगितायाअपिसाध्यव्यापकतयातत्प्रतियोगिताकस्यात्मत्वसामान्याभावस्यतादृशप्रतियोगि
त्वाश्रयसामानाधिकरण्याभावाद्यमात्माज्ञानादित्यादावव्याप्तिवारकत्वादितिसंप्रदायविदः इतिजागदीशी॥ अत्रेदंशंकते॥साध्यव्यापकता
वच्छेदिकायावंत्यः प्रतियोगिताः कस्मिंश्चिदभावेप्रत्येकंतत्तत्प्रतियोगिताश्रयसामानाधिकरण्यविवक्षणेनैवसामंजस्येहेतुसमानाधिकरण
पदस्यस्वविशिष्टपदस्यवैयर्थ्यमिति॥भट्टाचार्येणएतद्वैयर्थ्यभयेनएतत्कल्पस्यपरित्यक्ततयाजगदीशेनापितद्दोषेणापिसांप्रदायिकाइत्युक्त
मितिवाच्यं॥नचैवं।यत्समानाधिकरणादृत्यस्यवैयर्थ्यमित्याद्यभिधानासंगतिरिति॥मैवं।प्रतियोगिवैयधिकरण्यघटितव्यापकत्वस्यस्वयमेव
दूषितत्वेनप्रतियोगिवैयधिकरण्याघटितव्यापकत्वस्यानुसरणीय तयाजातिसामान्याभावाभावीयप्रतियोगित्वस्यापियावदन्तर्गततयाहेत्व
धिकरणावच्छेदेनतत्प्रतियोगिताश्रयसामानाधिकरण्यविरहादसंभवःस्यादतस्तदुपात्तं।नचतथापिभावभिन्नाभावीयनिरुक्ततत्तत्प्रतियोगि
ताश्रयसामानाधिकरण्यविवक्षणेनैवासंभववारणादुक्तदोषस्तादवस्थ्यमितिवाच्यम्।भावभिन्नत्वस्याभावान्विततयाप्रतियोगित्वांशेऽस्यानि
वेशेनयथासन्निवेशेवैयर्थ्याभावादितिध्येयम्।केचित्तुयत्समानाधिकरणाभावीयसाध्यव्यापकतावच्छेदकप्रतियोगिताकव्यापकोऽभावस्तत्त्व
मेवव्याप्तिः।व्यापकत्वंचस्वविशिष्टहेत्वधिकरणतात्वव्यापकत्वस्वनिरूपितत्वोभयसंबंधेनस्वविशिष्टहेत्वधिकरणतात्वव्यापकत्वंचस्वाश्रय
सामानाधिकरण्यस्वनिरूपकाभाववद्वृत्तित्वोभयसंबंधेनबोध्यम्।एवंचयत्समानाधिकरणाइत्यनुक्तौआत्मत्वाभावीयप्रतियोगित्वस्यनिरुक्तोभ

यसंबंधेनस्वविशिष्टहेत्वधिकरणतात्व व्यापकत्वात्। अव्याप्तिस्तदुपादानम्। कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगाभावनिष्ठप्रतियोगित्व
स्यप्रागुक्तोभयसंबंधेनहेत्वधिकरणतात्वव्यापकत्वादव्याप्तिः अतः स्वविशिष्टपदम्। नच स्वविशिष्टहेत्वधिकरणतात्वदिशिसंबन्धविधयास्व
निरूपकाभाववद्वृत्तित्वनिवेशनमनुचितमितिवाच्यं स्वविशिष्टसार्थक्यार्थंतन्निवेशात्। अन्यथायावत्वस्याभावविशेषणत्वेपिहेत्वधिकरण
ताव्यापकप्रतियोग्यधिकरणतावद्वृत्तित्वनिवेशेनापिसामंजस्येस्वविशिष्टपदवैयर्थ्यभयेनतदर्थंस्यक्ताहेत्वधिकरणत्वानियावन्तीत्यादिना
गुरुतरार्थकरणस्यानौचित्यादित्याहुः वस्तुतस्तुसाध्यव्यापकतावच्छेदिकायाःस्वन्यूनवृत्तिधर्मानवच्छिन्नयादृशप्रतियोगितायानिरूपको
ऽभावःस्वविशिष्टहेत्वधिकरणावच्छेदेनतादृशप्रतियोगिताश्रयसामानाधिकरण्यमेववक्तव्यं। तथाचधूमादिसामान्याभावस्यधूमत्वादिनाप्र
मेयसामान्याभावानतिरेकेपितदीयप्रमेयसामान्यनिष्ठप्रतियोगित्वंन्यूनवृत्तिनैवधूमत्वादिधर्मेणावच्छिन्नम् अतोनतादृशप्रतियोगिता
श्रयसामानाधिकरण्यमुपपादयतिप्रसंगइतियुक्तमुत्पश्यामइतिजगदीशः अथधूमाभावस्यधूमवद्वृत्तित्वविशिष्टगोत्वाभावात्मकतयास्वन्यू
नवृत्तिधर्मानवच्छिन्नगोत्वाभावनिष्ठप्रतियोगिताश्रयसामानाधिकरण्यादतिव्याप्तिः तादवस्थ्यमिति नचस्वसामानाधिकरण्येसतिस्वाश्रयव
न्निष्ठाभावप्रतियोगितावच्छेदकंयत्तद्वच्छिन्नंयत्तदन्यप्रतियोगित्वंस्वन्यूनवृत्तिधर्मानवच्छिन्नपदेनविवक्षणीयम्। तथाचधूमवद्वृत्ति
त्वविशिष्टगोत्वाभावनिष्ठप्रतियोगित्वस्यस्वसमानाधिकरणीभूतस्वाश्रयवन्निष्ठाभावप्रतियोगितावच्छेदकेनधूमवद्वृत्तित्वविशिष्टगोत्वाभा
वत्वावच्छिन्नत्वेनतादृशत्वाभावेननमादायातिव्याप्तिरितिवाच्यम् विशिष्टाभावोभयाभावमादायव्यधिकरणधर्मावच्छिन्नाभावविनिर्मोके
णसद्धेतुमात्रएवलक्षणगमनसंभवात् प्रतियोग्यवृत्तिश्चेत्यादिग्रंथानुत्थितिप्रसंगइत्यन्तरग्रंथासंगतेश्चैवं धूमवद्वृत्तित्वविशिष्टगोत्वाभावा
भावस्यधूमाद्यभावएवपर्यवसानात् तत्प्रतियोगित्वमपिधूमएवस्वीक्रियतेअतोनगोत्वाभावनिष्ठप्रतियोगित्वमादायातिव्याप्तिरिति। वस्तु

तस्तत्स्वन्यूनवृत्तित्वंस्वसमानाधिकरणत्वेसतिस्वाश्रयवन्निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकत्वम तो धूमवद्वृत्तित्वविशिष्टगोत्वाभावत्वा
वच्छिन्नाभावस्य धूमाद्यभावस्वरूपत्वेपितदीयधूमवद्वृत्तित्वविशिष्टगोत्वाभावत्वावच्छिन्नप्रतियोगित्वमादाय न धूमवान् वन्हेरित्यादावति ११
व्याप्तिः धूमवद्वृत्तित्वविशिष्टगोत्वाभावस्य गोत्वाभावनिष्ठप्रतियोगितायास्तादृशन्यूनवृत्तित्वात्। अतएवविशिष्टाभावमपहाय वाच्यत्वगग
नोभयाभावमादाय व्यधिकरणधर्मावच्छिन्नाभावविनिर्मोकेण लक्षणगगनद्वितीयलक्षणानुसारेबीजत्वेन दर्शितमि[illegible]यापिगोत्वाभावत्वे
न धूमवद्वृत्तित्वविशिष्टगोत्वाभावाभावस्य प्रमेयत्वेन धूमाधूमान्यप्रमेयोभयाभावस्य च धूमाभावानतिरेकितया तस्य निरुक्तस्वन्यूनवृत्तिधर्मानव
च्छिन्नप्रमेयत्वाद्यवच्छिन्नायाप्रतियोगितात दाश्रयसामानाधिकरण्यादतिव्याप्तिर्दुर्वारैवेति वाच्यं निरुक्तस्वन्यूनवृत्तिधर्मानवच्छि ------
न्नप्रतियोगिताया अभाववृत्तित्वेनापि विशेषणीयत्वात् वृत्तित्वंचस्व — निरूपकत्वस्वाश्रयवृत्तित्वावच्छेदकधर्मावच्छिन्नाधिकरणवृत्तित्वोभय
संबंधेनबोध्यं वस्तुतस्तु स्वन्यूनवृत्तिधर्मानप्रतियोगित्वपदेन प्रतियोगिताविशिष्टप्रतियोगिताया विवक्षणान्नकोपि दोषः। वैशिष्ट्यं च स्वतादा
त्म्य उक्तस्वन्यूनवृत्तिधर्मावच्छिन्नत्वसंबंधावच्छिन्नस्वनिष्ठावच्छेदकभेदवत्त्वस्वकालीनाभाववृत्तित्वसंबंधावच्छिन्नस्वनिष्ठावच्छेदकताक
भेदवत्त्वेतत्त्रितयसंबंधेन संसर्गकघटकवृत्तिता च प्रागुक्तोभयसंबंधेनग्राह्येति बोध्यम्। अथ द्वितीयलक्षणे साध्यव्यापकतावच्छेदकरूपावच्छि
न्नत्वानु — पादाने जलवृत्तित्वविशिष्टद्रव्यत्वाभावे तद्वृत्तित्वविशिष्टसत्ताद्यभावं चादाय वन्हिमान् धूमात् सत्तावान् द्रव्यत्वात् इत्यादावव्याप्ति
र्दत्ता जगदीशेन सा न संगच्छते। तादृशविशिष्टाभावस्य तत्प्रतियोगितावच्छेदकीभूतद्रव्यत्वत्वावच्छिन्नसामानाधिकरण्यात् न च प्रतियो
गितावच्छेदकतायाः पर्याप्तिनिवेशाभिप्रायेण तदभिहितमिति वाच्यं व्यभिचारिणि यावदन्तर्गतो योव्यभिचारनिरूपकाधिकरणस्थलवृत्तित्वा
भावविशिष्टाभावस्तस्य स्वप्रतियोगितावच्छेदकीभूतव्यभिचारस्थलवृत्तित्वाभावावच्छिन्नसामानाधिकरण्यविरहेणातिव्याप्तिविरहात्।
पर्याप्तिनिवेशस्य निष्प्रयोजनकतया परित्याज्यत्वात्। मैवम्। पर्याप्तिनिवेशेपि यावदन्तर्गतस्य साध्यव्यापकतावच्छेदकप्रतियोगिताकस्याभेयता

संबंधेनजलविशिष्टाभावस्य स्वप्रतियोगितावच्छेदकीभूतजलावच्छिन्नसामानाधिकरण्यविरहेणवन्हिमान्धूमात् सत्तावान्द्रव्यत्वादित्या
दावव्याप्तिरित्यत्रैवजगदीशस्यतात्पर्यादितिकेचिदाहुस्तन्न पर्याप्तिनिवेशेपिवाच्यत्वगोत्वोभयाभावमादायलक्षणसमन्वयेप्रतियोग्यवृत्ति
श्चेत्यादिग्रन्थानुत्थितिप्रसंगात्। उक्तोभयाभावस्यप्रतियोगितावच्छेदकीभूतवाच्यत्वत्वाद्यवच्छिन्नसामानाधिकरण्यात्। तस्मात्समनियत·
नानाधर्मावच्छिन्नप्रतियोगितायाऐक्यमतेव्यभिचारिस्थलरत्त्यभावस्यप्रतियोगितायाव्यभिचारिस्थलावृत्तित्वविशिष्टवाच्यत्वत्वादिनाप्यवच्छि
न्ननयातत्प्रतियोगितावच्छेदकीभूतवाच्यत्वत्वाद्यवच्छिन्नसामानाधिकरण्यासत्त्वाद्व्यभिचारिण्यतिव्याप्तिरतः। पर्याप्तिनिवेशस्यावश्यकत्वं
मितियुक्तमुत्पश्यामः। अथेदंवाच्यंज्ञेयत्वादित्यादावपिसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्याधेयतासंबंधेनघटविशिष्टाद्यभावस्यप्रति
योगितावच्छेदकीभूतघटाद्यवच्छिन्नसामानाधिकरण्यविरहादसंभवसंभवेऽव्याप्तिदानंजगदीशस्यासंगतमितिचेन्न। अव्याप्तिपदस्यासं
भवपरत्वादिति। केचित्तुसाध्यताघटकसंबंधेनव्यापकत्वंतेनैवप्रतियोगित्वंप्रतियोगितावच्छिन्नसामानाधिकरण्यंचवाच्यं। तथाचकाले
घटवान्महाकालत्वादित्यत्रलक्षणगमनासंभवः महाकालान्यत्वविशिष्टाधिकरणत्वस्यापिमहाकालेस्वीकारादित्याहुः॥ १ ॥व्याप्यवृत्तेर्हेतु
समानाधिकरणस्यसाध्याभावस्यप्रतियोगितायाअनवच्छेदकंयत्साध्यतावच्छेदकंतदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति। चक्रवर्त्तिल·
क्षणेअव्याप्यवृत्तिसाध्यकेसाध्याभावमादायाव्याप्तिवारणायव्याप्यवृत्तीति। वन्हित्वादिनाघटाद्यभावमादायाव्याप्तिवारणायसाध्येतिप्रतियोगि
वैयधिकरण्यप्रवेशेवाच्यंज्ञेयत्वादित्यत्राव्याप्तिःप्रतियोगिव्यधिकरणाभावाप्रसिद्धेरतस्तदुपेक्षितंननुसमनियताभावानामैक्यमतेघटत्वेनवन्ह्य
भावस्यैववह्नित्वेनघटाद्यभावतयाहेतुसमानाधिकरणस्यतादृशस्यैवसाध्याभावस्यप्रतियोगितावच्छेदकंवह्नित्वादिकमित्यव्याप्तिरतः समनियता·
भावैक्यमतेनिरुक्तिमाह। हेतुसमानाधिकरणस्येतिजगदीशः॥२॥नचात्रयादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वंहेतुमतस्तादृशप्र

नियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षणेन वाच्यं ज्ञेयत्वादित्यादावव्याप्तिविरहाद्व्याप्यवृत्तित्वनिवेशनमनुचितमिति वाच्यं वह्नित्वे
न घटाद्यभावमादाय वह्निमान् धूमादित्यादावव्याप्तिवारकसाध्याभावपदवैयर्थ्यापत्तेरिति। न चाग्रिमलक्षणे विवक्षणीयस्य साध्यतावच्छेदकसं
बंधेन स्वसमानाधिकरणस्वावच्छेदकीभूतधर्मावच्छिन्नाधिकरणयावद्वृत्त्वधिकरणिका — यावत्यः प्रतियोगितास्तदन्यप्रतियोगितानवच्छेदकत्व
स्यात्रापि विवक्षणान्न वाच्यं ज्ञेयत्वादित्यत्राव्याप्तिर्न वा साध्याभावपदवैयर्थ्यमिति वाच्यं। तादृशविशेषणस्य गुरुतया निवेशयितुमशक्यत्वात्
अथ समनियताभावैक्यमते हेतुसमानाधिकरणाभावीयसाध्यनिष्ठप्रतियोगितानवच्छेदकत्वविवक्षणेनैव घटत्वेन वन्ह्यभावस्य वह्नित्वेन घटाभा
वत्वेपि तदीयसाध्यनिष्ठप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वेनाव्याप्त्यभावात्कृतं लक्षणांतरानुसरणेनेति चेन्न। विवक्षितव्याप्यवृ
त्तित्वस्य तत्तदभाव एव पर्यवसिततया व्याप्यवृत्तितत्तदभावप्रतियोगितावच्छेदकत्वाभावकूटस्य व्याप्तिघटकत्वे व्याप्यवृत्तियावदभावान्तर्गतघ
टाद्यभावनिरूपितसाध्यनिष्ठप्रतियोगितावच्छेदकत्वस्याप्रसिद्ध्या तदभावाप्रसिद्धेर्वन्हिमान्धूमादित्यादावव्याप्तिरिति। व्याप्यवृत्तित्वघटितं
लक्षणद्वये संयोगी सत्वादित्यत्रातिव्याप्तिमाशंक्य वक्ष्यमाणं वा प्रतियोगितानतिरिक्तवृत्तित्वमेव दीधीतिपर्यवसितभावार्थमाह। तथा चेति हेतुस
मानाधिकरणाभावीयं यत्संबंधावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकं यद्धर्मविशिष्टसंबंधिनिष्ठाभावीयतत्संबंधावच्छिन्नप्र
तियोगितायाः सामानाधिकरण्येनानवच्छेदकं तदेव पारिभाषिकावच्छेदकमित्यादिना। अथैतदर्थस्य साध्याभावाघटिततया द्वितीयलक्षणाभि
प्रायक एवायं ग्रंथः। प्रथमलक्षणस्य तु हेतुसमानाधिकरणसाध्याभावप्रतियोगितावच्छेदकं यद्धर्मविशिष्टसंबंधिनिष्ठाभावप्रतियोगितायाः सा
मानाधिकरण्येनानवच्छेदकं तदेव पारिभाषिकावच्छेदकमित्यर्थः। तथा चेन्धनत्वेन वन्ह्यभावप्रतियोगितावच्छेदकीभूतेन्धनत्वस्य वन्हित्व
विशिष्टसंबंधिनिष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकतया पारिभाषिकावच्छेदकत्वस्य वन्हित्वे सत्त्वात्। वन्हिमान्धूमादित्य

ग·व्या त्राव्याप्तिरिति।यद्धर्मविशिष्टसंबंधिनिष्ठाभावप्रतियोगितायाःसामानाधिकरण्येनानवच्छेदकत्वप्रवेशःयद्धर्मविशिष्टसंबंधिनिष्ठाभावीययद्धर्मसमा
ग·शं· नाधिकरणप्रतियोगितानवच्छेदकत्वस्यतादृशसाध्याभावप्रतियोगितावच्छेदके विवक्षणीयत्वात्तथाचवन्हित्वविशिष्टसंबंधिनिष्ठाभावीय
१२ वन्हित्वसमानाधिकरणप्रतियोगितानवच्छेदकत्वस्येन्धनत्वेसत्वात्।वन्हिमान्धूमादित्यादौहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकघट
त्वेघटत्वविशिष्टसंबंधिनिष्ठघटत्वेनघटाभावीयघटत्वसमानाधिकरणप्रतियोगितानवच्छेदकत्वान्नतादृशावच्छेदकाप्रसिद्धिरिति।तादृशसाध्या
भावप्रतियोगितावच्छेदकेयद्धर्मविशिष्टसंबंधिनिष्ठाभावीयप्रतियोगितायाःसामानाधिकरण्येनानवच्छेदकत्वेसतियद्धर्मसामानाधिकरण्यस्य
विवक्षणान्नदोषइत्यपिवदन्ति॥साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यावच्छेदकस्वसमानाधिकरणसाध्याभाववत्त्वकत्वमितिशिरोम-
णिः॥अत्रसाध्यसामानाधिकरण्यंयेनसंबंधेनसाध्यतातेनसंबंधेनसाध्याधिकरणेदैशिकविशेषणतयावृत्तिमत्वरूपंग्राह्यं।तेनद्रव्यत्वादिसमानाधि
करणज्ञानाद्यभावस्यविषयतयाज्ञानाधिकरणेवृत्तावपिज्ञानवान्द्रव्यत्वादित्यादौनातिव्याप्तिः।नवाकालःप्रमेयत्वादित्यादौअतिव्याप्तिरितिजग
दीशाः।नचात्रयावदंतर्गतस्यव्यभिचारनिरूपाधिकरणान्यत्वाद्यभावस्यकालिकसंबंधेनधूमाद्यधिकरणायोगोलकादौविशेषणतयावृत्त्याधूमवा
न्वन्हेरित्यत्रातिव्याप्तिसंभवेस्थलान्तरानुधावनमनुमितिवाच्यं।जन्यमात्रस्यकालोपाधितानभ्युपगमात्।नचतथापिसाध्यतावच्छेदकसंयोग
संबंधेनधूमाद्यधिकरणेमहाकालादौकालिकसंबंधेनतादृशाभावमात्रस्यैववृत्तेःप्रसिद्धस्थलएवातिव्याप्तिसंभवेसामानाधिकरण्यंचघटकवृत्ति
तावच्छेदकीभूतदैशिकविशेषणताविशेषसंबंधनिवेशार्थंकालःप्रमेयत्वादित्याद्यनुधावनमनुचितमिति।वृत्त्यनियामकसंबंधेनव्याप्यव्यापकभा
वानभ्युपगमेसंयोगसंबंधेनधूमाद्यधिकरणत्वस्यमहाकालेऽभावात्।धूमवान्वन्हेरित्यत्रातिव्याप्तिःसंभवात्।अतएवहेत्वधिकरणवृत्तितायांविशेष राम
णताविशेषसंबंधनिवेशव्यावृत्तयेकालःकालपरिमाणादित्यादिकालत्वमनुचितमिति।अत्रहेतुतावच्छेदकसंबंधेनहेत्वधिकरणत्वानिवेशेसमवाये १२

ति

नहेत्वधिकरणेधूमावयवादौवर्तमानस्यवन्ह्याद्यभावस्यसाध्यसामानाधिकरण्यविरहात्। वन्हिमान्धूमादित्यत्राव्याप्तिसंभवेऽयमात्माज्ञानादि
त्यादिपर्यंतानुधावनमनुचितमितिविभावनीयम्।।यत्समानाधिकरणसाध्याभावप्रमायांसाध्यवत्ताज्ञानप्रतिबंधकत्वंनास्तीतिप्रगल्भद्वितीयलक्ष
णेहेतुसामानाधिकरण्यंतुफलतःप्रमाविशेषणमितिजगदीशः। तदर्थश्चयद्धर्मावच्छिन्नवद्विशेष्यकसाध्याभावप्रमासामान्येसाध्यवत्ताज्ञानवि
रोधित्वंनास्तितद्धर्मवत्त्वमिति। अथात्रयद्धर्मावच्छिन्नावच्छेदकताकविशेष्यताकसाध्याभावप्रमासामान्येइत्यनुक्त्वायद्धर्मावच्छिन्नवद्विशे
ष्यकइत्यनेननानाधर्मावच्छिन्नविशेष्यताकप्रमासंग्रहकरणमनुचितमितिचेन्नबाधमुद्रयाप्रतिबंधकतायामव्याप्यवृत्तित्वज्ञानस्योत्तेजक
ताभिप्रायेणसंयोगवान्संयोगाभावादित्यादावतिव्याप्तेः संयोगाभावधर्मितावच्छेदकसंयोगवत्तानिश्चयस्यानाहार्यस्याप्रसिद्धत्वादिति।।अ
तएवनिरवच्छिन्नतयासाध्यवत्ताग्रहप्रतिबंधकतावच्छेदकीभूतसंबंधेनहेत्वधिकरणवृत्तित्वमभावेनिवेश्यप्रमायास्वयमेवनिवेशितं।एतेनयत्त्वि
त्यादिनाहेत्ववच्छिन्नविशेष्यकसाध्यज्ञानप्रतिबंधकत्वाभावघटितलक्षणमाशंक्यहेतुमन्मात्रविशेष्यकसाध्यवत्ताग्रहप्रतिबंधकत्वाभावघटित
गुरुतरलक्षणकरणमनुचितमितिपरास्तम्। हेत्वधिकरणवृत्तित्वस्यप्रमाविशेषणत्वेपिवह्निमान्धूमादित्यादावव्याप्तिः। हेतुमद्विशेष्यकधूमवान्व
न्हित्वेनघटाभाववान्वन्ह्यभावश्च ह्रद इत्याकारकसमूहालंबनप्रमायांसाध्यवत्ताज्ञानप्रतिबंधकत्वादितिचेन्न। हेतुमन्निष्ठविशेष्यताभिन्नसा
ध्याभावत्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वानिरूपकत्वस्यप्रमाविशेषणत्वेनविवक्षितत्वादिति तथाच हेतुमन्निष्ठविशेष्यताभिन्नसा
ध्याभावत्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यतानिरूपकत्वस्यतादृशप्रमायांसत्त्वेननाव्याप्तिरिति केचित्तु हेत्ववच्छिन्नविशे
ष्यतानिरूपितसाध्याभावत्वावच्छिन्नप्रमीयप्रकारतासामान्येसाध्यवत्ताज्ञानप्रतिबंधकतावच्छेदकत्वाभावघटितलक्षणविवक्षणान्नोक्तस
मूहालंबनबोधमादायाव्याप्तिरित्याहुः। तन्नमहानसीयवह्न्यभावप्रकारकज्ञानस्यसमवायेनवन्ह्यभावप्रकारकज्ञानस्यचतादृशसंबंधेनतादृश

व्य साध्यवत्ताज्ञानप्रतिबंधकतयावह्निमान्धूमादित्यादावव्याप्तिवारणायसाध्यवत्ताज्ञानपदेनसा।ध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्र
धा कारताशालिज्ञानंविवक्षणीयमित्यादिग्रंथासंगतेः।अथप्रतियोग्यवृत्तिश्चेत्यादिग्रंथानुस्थितिप्रसंगेनव्यापकत्वप्रतियोगितानांचैकसंबंधेनवि
१३ वक्षणीयतयासाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगित्वस्यचतत्पर्याप्त्यावच्छेदकताकत्वेनविवक्षणीयतयामहानसीयवन्ह्यभावस्य
समवायेनवह्न्यभावस्यचलक्षणाघटकतयासमवायेनवन्ह्यभावंमहानसीयवन्ह्यभावंचादायाव्याप्तिवारणार्थंसाध्यवत्ताज्ञानपदेनसाध्यता
वच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रकारताशालिज्ञानविवक्षणमनुचितमितिचेन्नधूमवान्वह्नित्वे
नघटाभाववान्महानसीयवह्न्यभाववांश्चेत्याकारकसमूहालंबनज्ञानस्यानुमितिप्रतिबंधकतयातमादायाव्याप्तिवारणायतन्निवेशस्याव
श्यकत्वात्।नचविवक्षितविशेष्यतानिरूपितसाध्याभावत्वावच्छिन्नप्रकारतासामान्येसाध्यवत्ताज्ञानप्रतिबंधकतावच्छेदकत्वाभावविव
क्षणेनैवसामंजस्येकृतंसाध्यतावच्छेदकधर्मसंबंधनिवेशेनेतिवाच्यंवह्नित्वेनघटाभावप्रमायांवह्नित्वेनवह्निघटोभयवत्ताबुद्धिप्रतिबंध
कतयावन्हिमान्धूमादित्यादावव्याप्तिरतस्तद्वारणायसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वस्यावश्यंनिवेशनीयतयातादृश
विशेषणस्यव्यधिकरणधर्मावच्छिन्नाभावसंग्राहकत्वेनप्रतियोगितायांव्यापकताघटकसंबंधावच्छिन्नत्वस्यानिवेशात्।समनियताभावा
नामैक्यमतेवह्नित्वेनघटाभावस्यस्वरूपसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावाभिन्नतयापर्वतःस्वरूपेणवह्निमान्नेतिप्रमीयप्रकारतायाअ
पिनिरुक्तसाध्याभावत्वावच्छिन्नप्रकारतासामान्यान्तर्गतत्वेतत्रस्वरूपसंबंधेनवह्निमत्ताज्ञानप्रतिबंधकतावच्छेदकत्वसत्त्वाच्चतथात्रैवव्याप्ति
वारणायसाध्यतावच्छेदकसंबंधावच्छिन्नत्वस्यचनिवेशावश्यकत्वादितिध्येयं।अथात्रसाध्यतावच्छेदकसंबंधेनरूपेणचसाध्यवत्त्वानिवे राम
शेसमवायसंबंधावच्छिन्नवन्ह्यभावप्रमांमहानसीयवन्ह्यभावप्रमांचादायाव्याप्तिर्दत्ताजगदीशेनसानयुज्यते।सर्वत्रैवसंबंधान्तरावच्छिन्नथ १३

र्मीतरावच्छिन्नसाध्याभावप्रकारकप्रमामादायासंभवस्यैव वक्तुमुचितत्वादिति चेन्न विशेषरूपेण संसर्गत्वस्य वृत्तिनियामकसंबंधेन व्याप्यव्या
पकभावस्य चानभ्युपगमेन प्रमेयवान् घटत्वादित्यादावेव लक्षणगमनात्। तत्र हेतुमद्विशेष्यकसंबंधान्तरावच्छिन्नसाध्यसामान्याभावप्रकार
कप्रमाया धर्त्तुमशक्यत्वात् न च तथापि साध्यतावच्छेदकधर्मस्यानिवेशे व्याप्तिकथनमनुचितम्। तदप्रवेशे संभवस्यासंभवादिति वाच्यं तदप्र
वेशे ऽसंभवसंभवेप्युभयव्यावृत्तिदानार्थमव्याप्तिकथनस्यैवौचित्यादिति दिक्॥ साध्याभाववति यद्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति तत्त्व
मिति प्रगल्भतृतीयलक्षणे यन्निष्ठसाध्याभाववद्वृत्तित्वसामान्यं विषयतया प्रकृतानुमितिप्रतिबंधकतानवच्छेदकं तत्त्वमर्थः। न च घटाभाव
वद्वृत्तित्वादौ साध्याभाववद्वृत्तिनात्वभ्रमदशायामपि धूमसाध्यकानुमित्युत्पत्त्या वह्निनिष्ठस्य निर्धूमवृत्तित्वस्य धूमसाध्यकानुमितिप्रतिबंध
कतानवच्छेदकताद्व्यभिचारिण्यतिव्याप्तिस्तादवस्थ्यमिति वाच्यं। यन्निष्ठसाध्याभाववद्वृत्तित्वविषयित्वसामान्यं न प्रकृतानुमितिप्रतिबंधक
तानतिरिक्तवृत्तितत्त्वमित्यस्योक्तत्वादिति जगदीशः। न चात्र यन्निष्ठवृत्तित्वविषयित्वसामान्यं न प्रकृतानुमितिप्रतिबंधकतानति[रि]क्तवृत्तित
त्वमित्यस्यैव सम्यक्त्वे साध्याभाववतीत्यस्य वैयर्थ्यमिति वाच्यं वह्नित्वावच्छिन्नप्रतियोगिताकघटाभाववन्हिसामान्याभावत्वमवगाह्यव
ह्न्यभाववद्वृत्तिधूम इत्याकारकज्ञानीयधूमादिनिष्ठवृत्तित्वविषयत्वस्य निरुक्तविषयित्वसामान्यान्तर्गतस्यानुमितिप्रतिबंधकतानतिरिक्तवृत्ति
भिन्नत्वाभावाद्वन्हिमान् धूमादित्यत्राव्याप्तिरतः अतस्तद्वारणाय यन्निष्ठवृत्तित्वपर्याप्त्यवच्छेदकताकविषयितासामान्यं न प्रकृतानुमितिप्र
तिबंधकतानतिरिक्तवृत्तितत्त्व[मि]त्यर्थो बोध्यः तथा च वन्हिनिष्ठवृत्तित्वपर्याप्त्यवच्छेदकताकविषयितासामान्यस्यैव धूमसाध्यकानुमितिप्रति
बंधकतानतिरिक्तवृत्तिभिन्नत्वेन धूमवान् वन्हेरित्यत्रातिव्याप्तिरतस्तद्वारणाय साध्याभाववतीत्यस्य सार्थ्यत्वात्। अथात्र यन्निष्ठसाध्याभाव
वद्वृत्तित्वविषयितासामान्यं प्रकृतानुमितिप्रतिबंधकतातिरिक्तवृत्तित्त्वमित्युक्तावेवसामंजस्ये निषेधद्वयोपादानमनतिप्रयोजकमिति॥ न च व

व्या॰ ह्नित्वेन घटाभाववद्वृत्ति धूमकालीन धूमो वह्निसामान्याभाववद्वृत्तिरित्याकारकज्ञानीय धूमनिष्ठवह्नित्वेन घटाभा[illegible] विषयित्वस्यापि निरुक्त
शा॰ विषयितासामान्यान्तर्गतत्वेन तस्य च प्रकृतानुमितिप्रतिबंधकतातिरिक्तवृत्तित्वविरहाद्वह्निमान् धूमादित्यादावव्याप्तिरतस्तद्वारणायानाहार्याप्र
१४ माण्यज्ञानानास्कंदितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयितायाव्यापकं प्रकृतानुमितिप्रतिबंधकत्वं तद्रूपावच्छिन्नविषयिताभिन्नं यन्नि
ष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्यं तत्वमित्यर्थकत्वे नैव तत्सार्थक्यमिति वाच्यं हेतुस्थले निरुक्तयद्रूपस्याप्रसिद्ध्या तादृशविवक्षा-
यामव्याप्तितादवस्थ्यादिति मैवम्। उक्ताव्याप्तिवारणायानाहार्यपदेन प्रकृतलक्षणस्य यद्रूपावच्छिन्नविषयितासामान्यं प्रकृतानुमितिप्रतिबं
धकताशून्यानाहार्याप्रामाण्यज्ञानानास्कंदितनिश्चयावृत्तितद्रूपावच्छिन्नविषयिताभिन्नं यन्निष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्यं तत्त्व
मित्यर्थकत्वेनाभावद्वयघटितत्वादेव तत्सार्थक्यादिति सद्धेतुस्थले तु संयोगी संयोगाभाववान् इत्याकारकज्ञानस्य निपताहार्यतया सर्वत्रैव यद्रूपप
देन संयोगाभावविशिष्टसंयोगत्वत्वस्य धर्तव्यतया यद्रूपावच्छिन्नविषयिताभिन्नत्वत्वस्य च साध्याभाववद्वृत्तित्वविषयितासामान्यस्यैव सत्त्वा
त्तामादाय लक्षणसमन्वयः। धूमवान्वन्हेरित्यादौ निर्धूमवृत्तित्वाभाववान् वह्निर्निर्धूमवृत्तिरित्याकारकाहार्यज्ञाने वह्निर्निर्धूमवृत्तिरिति ज्ञानो-
त्तरं दृढज्ञानमप्रमेत्यप्रामाण्यज्ञानविशिष्टज्ञाने एवं वह्निर्निर्धूमवृत्तिर्न वेति संशये च निर्धूमवृत्तित्वविशिष्टवह्नि[illegible] विषयित्वस्य वृत्तित्वे
न यद्रूपपदेन निर्धूमवृत्तित्वविशिष्टवन्हित्वस्य धर्तुमशक्यत्वाद् व्याप्तिरतस्तद्वारणायानाहार्यत्वस्याप्रामाण्यज्ञानानास्कंदितत्वस्य निश्चयत्व
स्य च निवेशः। न चात्र कल्पे साध्याभाववदित्यस्य वैयर्थ्यमिति वाच्यं। यद्रूपपदेन संयुक्तत्वाभावविशिष्टवह्नित्वेन घटाभाववत्संयुक्तस्य धर्तव्यतयास
युक्तत्वाभाववद्धूमो वन्हित्वेन घटाभाववद्वृत्तिरित्याकारकाहार्यज्ञानीयतद्रूपावच्छिन्नविषयिताभिन्नत्वस्य धूमनिष्ठवृत्तित्वविषयितासामान्ये राम
सत्त्वाद्वह्निमान् धूमादित्यादावव्याप्तिरतस्तद्वारणायोक्तरीत्या पर्याप्तिनिवेशो धूमवान्वन्हेरित्यादावतिव्याप्तिवारकतयैव सार्थक्यादिति ध्येयम्। १४

यावंतः साध्याभावाः प्रत्येकं तत्तत्सजातीया येन तत्तदधिकरणवृत्तित्वाभावास्तद्वत्त्वं तत्त्वमिति मिश्रस्य प्रथमलक्षणे ननु द्रव्यं विशिष्टसत्त्वादित्यत्राव्याप्तिः विशिष्टसत्त्वस्य सत्तानतिरेकेण द्रव्यत्वाभाववद्वृत्तित्वात् द्रव्यत्वाभावसजातीयस्य तत्तद्वृत्तित्वाभावस्य हेतावभावात्। नचैवं विशिष्टहेत्वधिकरणे वर्त्तमान एव साध्याभावो गृह्यतां तावतैवोक्तदोषव्युदासादिति वाच्यं तथापि धूमवान् वन्हेरित्यत्रातिव्याप्तिः निर्धूमवृत्तित्वसामान्याभावस्यापि महानसीयवन्हौ सत्त्वात्। नच हेतुतावच्छेदकधर्मावच्छेदेन तादृशवृत्तित्वाभाववत्त्वं विवक्षितं गौरवापत्तेरिति जगदीशेनोक्तं। तन्नसंगच्छते हेतुतावच्छेदकविशिष्टहेत्वधिकरणवृत्तित्वस्य साध्याभावविशेषणत्वे सद्धेतौ व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव लक्षणघटकतया तादृशयावदभावसजातीयव्यधिकरणधर्मावच्छिन्नतत्तदधिकरणवृत्तित्वाभावस्यैव हेतौ सत्त्वेनाव्याप्तिविरहेण प्रत्येकपदस्य तत्तदित्यस्य च वैयर्थ्यात्। नच हेत्वधिकरणवृत्तित्वस्य साध्याभावविशेषणत्वे प्रत्येकपदं तत्तत्पदं चानुपादेयमिति वाच्यं। तथा सति व्यभिचारिमात्र एव साध्यसामान्याभावघटितनिरुक्तयावत्साध्याभावसजातीयतत्तदधिकरणवृत्तित्वाभावस्याप्रसिद्धौ वातिव्याप्त्यसंभवेन तथापि धूमवान्वन्हेरित्यत्रातिव्याप्तिः। निर्धूमवृत्तित्वसामान्याभावस्यापि महानसीयवह्नौ सत्त्वादित्यादिग्रन्थे नातिव्याप्त्यभिधानासंगतेरिति विभावनीयम्। यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रतिव्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं तत्त्वमिति द्वितीयलक्षणे साजात्यं तु प्रागुक्तचरमदिशा ग्राह्यम् तेन संयोगसंबन्धावच्छिन्नद्रव्यत्वाभावप्रतियोगितावच्छेदकेन द्रव्यत्वत्वादिना वह्न्यादिव्यापकत्वेपि धूमवान् वह्नेरित्यादौ नातिव्याप्तिस्तादृशाभावस्य धूमादिसामान्याभावसाजात्यविरहादिति जगदीशः। न चात्र लक्षणे समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण साजात्यविवक्षणेपि प्रथमलक्षणोक्तदिशासंभवस्यासत्त्वात्। व्यभिचारिण्यतिव्याप्तिवारणसंभवाच्च तादृशसाजात्यविवक्षणस्यैवोचितत्वेन प्रागुक्तदिशोस्मनेन गगनाभावत्वतदन्यत्वान्यतररूपेण साजात्यविवक्षणमनुचितमिति

वाच्यं। तथासति व्यापकीभूतद्रव्यत्वस्य व्याप्यवृत्तेरित्यस्य वैयर्थ्यापत्तेः धूमवान् वन्हेरित्यादौ धूमाद्यभावसाजात्यं यद्धर्मत्वाद्यवच्छिन्नप्रतियोगि
ताकत्वं तस्य च वन्ह्यभावादावसत्त्वेन धूमाद्यभावसजातीयवह्न्यभावमादायातिव्याप्त्यसंभवात् इति नच तथापि द्रव्यत्वत्वस्य संयोगसंबंधेन प्रति
योगिव्यधिकरणवन्हिमन्निष्ठाभावप्रतियोगितावच्छेदकत्वे तत्संबंधावच्छिन्नाधेयतावच्छेदकत्वविरहेण वह्न्यादिव्यापकतावच्छेदकत्वविरहा
देवनातिव्याप्तिरिति वाच्यं गौरवेणात्र व्यापकतायां तत्संबंधावच्छिन्नाधेयतावच्छेदकत्वस्यानिवेशादिति ध्येयम्। अथात्र संयोगेन द्रव्यत्वाभाव
स्य धूमाद्यभावसजातीयत्वेपि वक्ष्यमाणोभयाभावघटितव्याप्यवृत्तित्वविरहादेवतादृशाभावस्य धर्तुमशक्यत्वेन तमादायातिव्याप्त्यभिधानम
नुचितमिति चेन्न पूर्वलक्षणोक्तदिशा यत्प्रतियोगिताकाभावे स्वावच्छेदकसंबंधेन स्वसामानाधिकरण्यस्वावच्छेदकावच्छिन्नसामानाधिकरण्यं
तदन्यप्रतियोगिताकत्वमेव व्याप्यवृत्तित्वमित्यभिप्रेत्यैवातिव्याप्तिविधानात्। यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्य
व्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयवत्त्वं तदन्यप्रतियोगित्वमेव व्याप्यवृत्तिनानिरूपकमिति प्रतियोगिनिस्वत्वमेतदभिप्रेत्यैव वातस्योक्त
त्वादिति। एतेन गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वानभ्युपगमे केवलान्वयिनि स्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरण॰
धर्मावच्छिन्नाभावभिन्नत्वोभयाभावाप्रसिद्ध्या व्याप्तिः सामानाधिकरण्यमात्रघटितोभयत्वस्यैव तादृशाभावप्रतियोगितावच्छेदकत्वादित्य
पि प्रयुक्तं केचित्तु समनियताभावानामैक्यमते संयोगसंबंधावच्छिन्नद्रव्यत्वाभावस्यैव द्रव्यत्वत्वेन घटाद्यभावतया तस्य च धूमादिसामा॰
न्याभावसजातीयस्य वक्ष्यमाणव्याप्यवृत्तिता निरूपकीभूतघटनिष्ठप्रतियोगितावच्छेदकेन द्रव्यत्वत्वादिना वह्न्यादिकं प्रति व्यापकत्वा
दतिव्याप्तिः स्यात् अतस्तद्वारणाय प्रागुक्तदिशैव साजात्यं ग्राह्यमित्याहुः अन्ये तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयनिष्ठं यद्रूपाव॰ राम
च्छिन्नप्रतियोगिताभाववत्त्वं तत्तत्साध्याभावव्यापकतावच्छेदकं तद्रूपेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वमित्यर्थः। अत्र १५

चसाध्याभावव्यापकतावच्छेदकत्वमपहाय साध्याभावसमानाधिकरणवृत्तित्वोक्तौ गुणान्यत्वविशिष्टसत्ताभाववान् द्रव्यान्यत्वविशिष्टसत्ता
भावादित्यत्रातिव्याप्तिः गुणान्यत्वविशिष्टसत्ताभावाभावरूपस्य द्रव्यान्यत्वाभावरूपस्य वा निरुक्तसाध्याभावस्य सजातीये समानाधिकरणे च सत्तारू
पे ऽभावे वर्त्तते यद्द्रव्यान्यत्वविशिष्टसत्ताभावत्वरूपयद्धर्मावच्छिन्नप्रतियोगिताकाभावत्वं तेन द्रव्यान्यत्वविशिष्टसत्ताभावत्वरूपधर्मेण हेतुतावच्छेद
कावच्छिन्नं प्रति व्यापकत्वावच्छेदात्। साध्याभावव्यापकतावच्छेदकत्वोक्तौ तु द्रव्यान्यत्वविशिष्टसत्ताभावत्वावच्छिन्नप्रतियोगिताकाभावत्वं न
साध्याभावव्यापकतावच्छेदकं द्रव्य एव व्यभिचारात् ततो नोक्तदोष इति जगदीशः। अथात्र व्यापकतावच्छेदकत्वमपहाय समानाधिकरणवृत्तित्वो
क्तौ धूमाभावरूपस्यायोगोलकान्यत्वाद्यभावरूपस्य वा साध्याभावस्य सजातीये समानाधिकरणे च सत्तास्वरूपे ऽभावे वर्त्तते यद्द्रव्यान्यत्वविशिष्टस
त्ताभावत्वाद्यवच्छिन्नप्रतियोगिकाभावत्वादिकं तत्प्रतियोगितावच्छेदकीभूतद्रव्यान्यत्वविशिष्टसत्ताभावत्वादि नावह्निव्यापकतया अवच्छे
दादुक्तरीत्या धूमवान् वन्हेरित्यत्रातिव्याप्तिसंभवे स्थलान्तरानुधावनमनुचितमिति चेदत्र केचित् गुणान्यत्वविशिष्टसत्ताभाववान् द्रव्यान्यत्ववि
शिष्टसत्ताभावादित्यस्योपलक्षणत्वाद्धूमवान् वन्हेरित्यत्रातिव्याप्तिर्भवत्येवेत्याहुः। परे तु साध्याभावसजातीयाभावस्य साध्यतावच्छेदकघटक
संबंधावच्छिन्नावच्छेदकताकप्रतियोगिताकत्वेन विशेषणीयत्वाद्धूमवान् वह्नेरित्यादौ द्रव्यान्यत्वविशिष्टसत्ताद्यभावत्वावच्छिन्नाभावस्यात
थात्वेन तमादायातिव्याप्त्यसंभवात् स्थलान्तरानुधावनमित्याहुः। अत्र यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयनिष्ठयद्रूपावच्छिन्नप्रतियो
गिताकाभावत्वं तत्तत्साध्याभावाधिकरणवृत्तितावच्छेदकमित्युक्तावप्यतिव्याप्तिवारणसंभवाद्व्यापकतावच्छेदकत्वनिवेशनमनुचितमिति वि
भावनीयं। अथात्र द्रव्यान्यत्वविशिष्टसत्ताभावत्वावच्छिन्नप्रतियोगिताकाभावत्वस्य साध्याभावसमानाधिकरणवृत्तित्वेपि द्रव्यान्यत्ववि शि
ष्टसत्तास्वरूपस्य तादृशाभावस्य सत्तानतिरिक्ततया यत्प्रतियोगिताकाभावस्यावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छि

गा॰व्य॰ न्नाभावभिन्नत्वोभयाभावस्तादृशप्रतियोगिताकत्वरूपव्याप्यवृत्तित्वलक्षणघटकतयातमादायातिव्याप्त्यसंभवेनसाध्याभावसमानाधिकर
क्रा॰शं॰ णवृत्तित्वमात्रोक्तावपिसामंजस्येव्यापकतावच्छेदकत्वप्रवेशोव्यर्थइति।नचाभावेउभयाभावमपहायप्रतियोगितानिरूपितानुयोगिता
१६ याःस्वावच्छेदकावच्छिन्नाधिकरणवृत्तितावच्छेदकत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगित्वानिरूपितत्वोभयाभावस्तादृशप्रतियोगिताकत्व
मेवव्याप्यवृत्तित्वंवक्तव्यम्।तच्चद्रव्यान्यत्वविशिष्टसत्ताभावाभावेप्यक्षतमेवेतिवाच्यं अतिव्याप्ति।नाद्यतादृशव्याप्यवृत्तित्वनिवेशस्यानौ
चित्यादिति॥परेतुवृत्तिमद्वृत्तयोयावंतःसाध्याभाववद्वृत्तित्वाभावास्तद्वत्वमितिशिरोमणिः।नचैवमपिव्यधिकरणधर्मावच्छिन्नद्रव्यत्वाभाव
वद्वृत्तितात्वेनघटवृत्तित्वजातित्वान्यतरस्यघटावृत्तेर्वोअभावमादायद्रव्यंपृथिवीत्वादित्यादावव्याप्तिरितिवाच्यं।हेतुतावच्छेदकसंबंधाव
च्छिन्नवृत्तिताभिन्नावृत्तित्वेनापिप्रतियोगितायाविशेषणीयत्वादितिजगदीशः।अथात्रान्यतराभावपर्यंतानुसरणमे तल्लक्षणेसामान्यधर्मे
णविशेषाभावमनभ्युपेत्यैवतदभ्युपगमेतुसर्वत्रव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तितात्वेनहेतुनिष्ठवृत्तित्वाभावमादायएतल्लक्षण
स्यासंभवापत्तेःस्वावच्छिन्नस्वस्वन्यूनवृत्तित्वस्वव्याप्यत्वेतत्त्रितयसम्बंधेनधर्मविशिष्टान्यप्रतियोगित्वविवक्षणे नायंदोषइतिध्येयम्।नचत
थापिव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तितात्वेनस्वनिष्ठवृत्तित्वगगनान्यतरा भावमादायैवैतल्लक्षणस्यासंभवसंभवेकथमव्याप्ति
र्दत्ताजगदीशेनेति वाच्यम्।पृथिवीत्वादिकप्रतियोगिकसमवायादिसंबंधेनहेतुतायांद्रव्यंपृथिवीत्वादित्यादावेवलक्षणगमनात्।तत्रैतेन
संबंधेनहेतोरेववृत्तिमत्तयातद्वृत्तियावदभावस्यैवतत्रसत्वात्।यत्तुस्वनिष्ठवृत्तितात्वेनवृत्तित्वसामान्याभावमादायासंभवउक्तस्तदपिविशेष राम
रूपेणसंसर्गतामनभ्युपेत्यैवव्यधिकरणधर्मावच्छिन्नसाध्याभावतादात्म्यसंबंधावच्छिन्नवृत्तितायाजगत्त्वरूपत्वेनतादात्म्येनप्रमेयहेतौ १६
लक्षणगमनान्नासंभवइत्यपिवदंति।अथतथापिव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्ति तात्वेनपर्वतवृत्तित्वजातित्वैतदन्यतराभावमादा

यवह्निमान्धूमादित्यत्राव्याप्तिसंभवेद्द्रव्यंपृथिवीत्वादित्पर्यंतानुसरणंसंदर्भविरुद्धमितिचेन्न हेतुतावच्छेदकीभूतसंयोगसंबंधावच्छिन्नवृत्ति
त्वस्यसंयोगरूपत्वेनाव्याप्यवृत्तितयातादृशाभावस्यधूमादौसत्वेनतत्राव्याप्तिविरहात्। नचैवंधूमवान्वह्नेरित्यत्राव्याप्तिरितिवाच्यंतस्यम
हाकालान्योघटादित्यादेस्तुल्यत्वेनयथाश्रुताभिप्रायेणतत्रातिव्याप्तिविरहादितिध्येयं। केचित्तुवह्निमान्धूमादित्यादिवत्समवायेनद्रव्यत्वादि
कसाध्यकपृथिवीत्वादिहेतुकोपिप्रसिद्धस्थलएव। अतएवकूटघटितलक्षणेवह्निमान्धूमादित्यत्रसाध्यतावच्छेदकीभूतसंयोगसंबंधेनविपक्षी
भूततत्तज्जलावृत्तित्वावच्छिन्नाभावकूटस्यगुणादौद्रव्यंपृथिवीत्वादित्यत्रविपक्षीभूतरूपरसादिप्रत्येकासमवेतत्वाद्यवच्छिन्नाभावकूटस्यत्या
दौअधिकरणतासत्वात् तदप्रसिद्धिनिबंधनाव्याप्तेरुक्तस्थलेविरहात्। तदुभयंनोदाहृतमितिग्रंथकृतैवोक्तमित्याहुः। अथप्रतियोगितायांहेतुता
घटकसंबंधावच्छिन्नवृत्तिताभिन्नावृत्तित्वेनविशेषणत्वेपिसाध्याभाववद्वृत्तितात्वेनघटवृत्तित्वतदन्यवृत्तित्वोभयाभावमादायाव्याप्तिर्दुर्वारैव
तिचेन्नसार्वभौममतेउभयत्वस्यैकविशिष्टापरत्वरूपत्वेनविशिष्टस्यचातिरिक्ततयाउक्ताभावस्यधर्तुमशक्यत्वात्॥ अथवातादृशवृत्तिताभि
न्नावृत्तित्वेनैवव्यासज्यवृत्तिधर्मानात्मकत्वेनापिप्रतियोगितायांविशेषणीयत्वान्नदोषः। उक्ताभावीयप्रतियोगित्वस्यप्रतियोग्यंशेप्रकारीभूतद्वित्व
स्वरूपत्वादिति। एतेनतादात्म्येनप्रमेयहेतुकस्थलेसाध्याभाववद्वृत्तितात्वेनयावान्नास्तीत्यभावमादायैवलक्षणसमन्वयेनतत्राव्याप्तिवारणाय
केचित्त्वित्यादिनावक्ष्यमाणनिषेधद्वयप्रवेशेव्यावृत्तिदानमसंगतमित्यपिनिरस्तं। उक्ताभाववारकविशेषणस्यावश्यकत्वादितिध्येयम्। अन्ये
तुवृत्तिमद्व्यक्तयोयावन्तःसाध्याभावकूटाधिकरणवृत्तित्वाभावास्तद्वत्त्वंतत्त्वमितिशिरोमणिः। अत्रप्रतियोगितांप्रतिव्यापकत्वंसाध्यतावच्छेद
कताघटकसंबंधेनैवंग्राह्यम्। तेननित्यज्ञानवत्तस्तादात्म्येनसाध्यतायांईश्वरत्वादिहेतौघटान्यभेदस्यपटान्यभेदस्यचद्वयोः विषयतासंबंधेन
प्रतियोगिताव्यापकीभूतनित्यज्ञानकयोःसाध्यतावच्छेदकव्यापकप्रतियोगिताकयोरेकाधिकरणाप्रसिद्धावपिनाव्याप्तिर्नवातादृशएवसाध्येद्र।

१·व्य· व्यत्वप्रकारकप्रमाविशेष्यत्वादित्यत्र पृथिव्यादौ साधनसमानाधिकरणस्य पृथिव्यादिनवद्रव्याणां प्रत्येकभिन्नद्रव्यभेदकूटाधिकरणे गुणादौ हेतौ
२·शां· रसत्त्वेपि ऽतिव्याप्तिरिति जगदीशः। अथात्र प्रागुक्तरीत्या ऽत्रापि घटान्यभेदपटान्यभेदादीनामपि कूटान्तर्गतत्वात् तद्वति तेकूटाधिकरणाप्रसिद्धैवना
१७ तिव्याप्तिरिति नच साध्यतावच्छेदकसंबंधेन स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताग्रहविरोधिताघटकसंबंधेन वृत्तित्वमद्भावस्य प्रागुक्त
तया घटान्यभेदादेस्तादृशसंबंधेनावर्तमानत्वेन लक्षणाघटकत्वम्। अत एव प्रागुक्ताव्याप्तिमपहाय अतिव्याप्त्यभिधानमपि संगच्छते इति वाच्यं
पृथिवीभिन्नद्रव्यगुणान्यतरभेदजलभिन्नद्रव्यकर्मान्यतरभेदतेजोभिन्नद्रव्यसामान्यान्यतरभेदादीनामपि तादृशत्वेन तद्घटितकूटाधिकरणाप्र
सिद्धौ वा तिव्याप्त्यभिधानासंगच्छतेरिति चेन्न तादात्म्येन नित्यज्ञानविशिष्टस्य समवायेन साध्यतायां द्रव्यत्वप्रकारकप्रमाविशेष्यत्वादिहेतौ साध
नसमानाधिकरणघटासमवेताभावपटासमवेताभावघटितकूटाधिकरणजात्यादौ हेतोरसत्त्वेनातिव्याप्तेरेव तद्ग्रन्थस्य तात्पर्यादिति ध्येयम्॥ न
नु यावतां मिथः सामानाधिकरण्यं तावतां समुदायो विवक्षितः किं यावतां साध्याभावान्तरेण सामानाधिकरण्यं तावत्समुदायो विवक्षितः प्रथमे इ
ष्टमित्यादि जगदीशः। अत्र प्रथमकल्पे स्ववृत्तिसाध्याभावत्वव्यापकं यद्यदधिकरणवृत्तित्वं तत्तदधिकरणवृत्तिसाध्याभावत्वव्यापकाधेयताकं यद्व
त्तावदन्यतमवृत्तित्वाभावः पर्यवसितः किं वृत्तिसाध्याभावत्वव्यापकसमुदायत्वावच्छिन्नसमानाधिकरणसाध्याभावसमुदायत्वावच्छिन्नाधिकर
णतावद्वृत्तित्वभावो वा समुदायलक्षणवाक्यस्य पर्यवसितार्थः। अन्यतमत्वं च तत्तदधिकरणावृत्ति धर्मशून्यत्वमतो न केव[illegible]दिति। अत्रेदमि
ति पृथिव्या विशेषणं न तु पक्षनिर्देशः तथा सति घटतद्वायुद्वित्व पटतद्वायुद्वित्वादीनां तद्वायोर्मिथः सामानाधिकरण्यापन्नसाध्याभावाधिकरणे
तद्वायौ वृत्तिमत्त्वादेव वायुत्वादिहेतावतिव्याप्त्यनुपपत्तेरिति जगदीशः। न च कपिसंयोगीसत्त्वादित्यादावतिव्याप्तिवारणाय साध्याभावाधिकरण राम
तायां निरवच्छिन्नत्वस्य निवेशनीयत्वात्। कपिसंयोगाभाववान् मेयत्वादित्यादावव्याप्तिवारणायावश्यं साध्याभावोपि व्याप्यवृत्तित्वेन वि १७

शेषणीयः। तथा चोक्तव्यक्तीनां व्याप्यवृत्तिभावेन लक्षणघटकत्वमिति वाच्यम् प्राचीनमते हृत्वादिमति तत्प्रागभावकालावच्छेदेनासंताभावसत्वा
त् स्वाधिकरणयत्किंचिद्व्यक्तिनिष्ठात्यन्ताभावाप्रतियोगित्वरूपव्याप्यवृत्तित्वस्य हृत्वादेरपि सत्वात् नच नव्यमतानुसारेण तत्स्थलं परित्यज्य स
त्तान्यपृथिवीसमवेतशून्यमित्यादिस्थलानुधावनं कृतं तत्र च पृथिवीपदस्य पृथिवीसामान्यपरत्वे प्राग[illegible] हृत्वादे[illegible]या[illegible]विव्याप्यभिधा
वनासंगतिरिति यदुक्तं तन्नसंगच्छते नव्यमते हृत्वादीनां निरुक्तव्याप्यवृत्तित्वाभावादिति वाच्यं। उभयमतसाधारण्याय तस्योक्तत्वात् नच स
त्तान्यएतत्पृथिवीसमवेतत्वावच्छिन्नाभावोप्यप्रसिद्धो द्रव्यत्वत्वस्यैव तदवच्छेदकत्वादिति वाच्यं सकलद्रव्यवृत्तित्वादिघटितस्य द्रव्यत्वत्व
स्यैव तादृशसमवेतत्वापेक्षया गुरुतया नवच्छेदकत्वादिति जगदीशः। अत्रेयमापत्तिः अथात्र द्रव्यत्वत्वस्य तादृशसमवेतत्वापेक्षया गुरुत्वेपि द्र
व्यान्यासमवेतत्वस्य लघुत्वेन सत्तान्यैतत्पृथिवीसमवेताभावीयप्रतियोगितावच्छेदकत्वसंभवात् सत्तान्यैतत्पृथिवीसमवेतत्वावच्छिन्ना
भावस्याप्रसिद्धत्वेन तादृशाभावसाध्यकव्यभिचारिण्यतिप्रसंगोपादानमनुचितमिति ध्येयं। नच पर्वतवृत्तित्वपर्वतान्यवृत्तित्वोभयत्वावच्छि
न्नाभावमादाय व्याप्तिवारणार्थं व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन प्रतियोगितावद्रूपं विशेषणीयमिति तत एव वृत्तित्वालोकान्यत्वोभयाभावस्याप्यु
दासात् तादृशवृत्तिना त्वेप्रतियोगिताव्यापकत्वस्योपादानं विफलमिति वाच्यं पर्वतवृत्तित्वपर्वतान्यवृत्तित्वोभयत्वावच्छिन्नाभाववारणाय वृ
त्तित्वपर्याप्त व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेनैव प्रतियोगिताया वक्तव्यत्वात् तादृशप्रतियोगिताकत्वस्य च वृत्तित्वालोकान्यत्वोभयाभावेपि स
त्वादिति जागदीशी नचात्र व्यासज्यवृत्तिधर्मस्य वृत्तित्वपर्याप्तत्वविशेषणवैयर्थ्यमिति वाच्यम्॥ तस्याखण्डाभावघटकतया सार्थकत्वात् नच
वृत्तित्वपर्याप्तव्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन प्रतियोगिताया विशेषणीयत्वेपि साध्याभाववद्वृत्तितात्वेन पर्वतवृत्तित्वपर्वतान्यवृत्तित्वो
भयाभावमादाय व्याप्तितादवस्थ्यमिति वाच्यम्। यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्ना

 भावभिन्नत्वोभयाभावः वृत्तित्वपर्याप्तव्यासज्यवृत्तिधर्मानवच्छिन्नतादृशप्रतियोगिताप[illegible]त्वात्। अथवातादृशव्यासज्यवृत्तिधर्मानवच्छि
 न्नत्वपदेनतादात्म्यसंबंधेनतादृशव्यासज्यवृत्तिधर्मविशिष्टान्यत्वस्यैवविव[illegible]णान्नदोषउक्ताभावप्रतियोगि[illegible]त्यप्रतियोग्यंशेप्रकारीभूततादृश
 धर्मस्वरूपत्वादितिध्येयं। अथात्रसर्वत्र .तुतावच्छेदकावच्छिन्नवृत्तित्वतदन्यवृत्तित्वोभयाभावमादायासंभवसंभवेः व्याप्तिवारणार्थंव्यासज्य
वृत्तिधर्मानवच्छिन्नत्वेनप्रतियोगिताविशेषणीयकथमुक्तंजगदीशेन असंभववारणार्थमितस्यैववक्तुमुचित त्वादितिमेवम्। तद्धर्मीयसंयो
गेनधूमहेतुकस्थले तादृशसंबंधेनयोवृत्तिमान् तद्वृत्तियावद्भावस्यैवहेतौसत्वेनलक्षणगमनादितिध्येय परेतुतादात्म्येनप्रमेयहेतुकस्थले
तद्वृत्तित्वतदन्यतद्वृत्तित्वोभयाभावप्रतियोगितावच्छेदकत्वस्यैवलाघवात्तद्वृत्तितात्वेकल्पनीयतयातादृशाभावस्यलक्षणाघटकत्वात् गुरुधर्म
स्यप्रतियोगितानवच्छेदकत्वात् तत्रलक्षणगमनान्नासंभवाभिधानमितिप्राहुः अत्रकेचित् सार्वभौममतेसामानाधिकरण्यस्याव्याप्यवृत्तित
यारवंडाकालाद्यवच्छेदेनघटादावेववृत्तिमतिनिवर्तमानस्यमहाकालवृत्तित्वसामान्याभावस्ययावद्धेत्वधिकरणावच्छेदेनहेतावसत्वान्महा
कालान्योघटादित्यादौनातिव्याप्तिः। वृत्तिमद्वृत्तयोयावन्तःतादृशवृत्तित्वाभावायावद्धेत्वधिकरणावच्छेदेनतद्धेतुत्वस्यविवक्षितत्वादित्याद इति
जगदीशः। अथात्रकस्यैववह्निमान्धूमादित्यादावव्याप्तिः धूमावयवावच्छेदेनसाध्याभावकूटवत्संयुक्तत्वसामान्याभावस्यवृत्तिमतिधूमादौप्र
सिद्धस्ययावद्धेत्वाधिकरणावच्छेदेनहेतावसत्वात्। नचहेतुतावच्छेदकसंबंधेनयत्किंचिद्धेत्वधिकरणावच्छेद्यत्वेनसाध्याभावकूटवद्वृत्तित्वा
भावस्यविशेषणीयतयातादृशवृत्तित्वाभावोनलक्षण घटकइतिवाच्यम्। धूमान्तरसंयुक्तस्यावयवावच्छेदेनवृत्तिमतियत्किंचिद्धूमेप्रसिद्ध 
स्यतादृशवृत्तित्वसामान्याभावस्ययावद्धेत्वावच्छेदेनहेतावसत्वात्तत्तयाप्यव्याप्तेरितिचेदत्रनवीनाः हेतुतावच्छेदकसंबंधेनयत्त्वाधिक 
रणतद्व्यक्तित्वेनस्वस्मिन्वर्तमानाद्धेतुसमानाधिकरणसाध्याभावसमुदायाधिकरणवृत्तितात्वसमनियतप्रतियोगिताकायावन्तोऽभावाया

वह्नेत्व धिकरणावच्छेदेनहेतौतद्वत्त्वस्यविवक्षितत्वात् नकोपिदोषःस्वपदंरत्निमत्त्वेनाभिमतपरमितिमाहुः।केचित्तुस्वानुयोग्यनधिकरणावच्छिन्ना
याःधिकरणतानत्तदन्यहेतुत्वधिकरणावच्छिन्नाधिकरणताकत्वेननतादृशसाध्याभावसमुदायाधिकरणवृत्तित्वाभावस्यविशेषणीयत्वात्तादृशाभा
वस्यलक्षणघटकतयातमादायनदोषःस्वानुयोग्यनधिकरण त्वंचहेतुनावच्छेदकसंबंधेनबोध्यं स्वपदतादृशसाध्याभावसमुदायाधिकरणवृत्ति
त्वाभावाधिकरणतापरमित्याहुः अथात्र लक्षणेघटवृत्तित्वविशिष्टवाच्यत्वघटान्यवृत्तित्वविशिष्टवाच्यत्वाद्यभावमादायवाच्यंज्ञेयत्वादित्यत्रा
व्याप्तिः।तादृशसाध्याभावघटितकूटाधिकरणाप्रसिद्धेः नचविशिष्टस्यातिरिक्तत्वमतेविशिष्टाभावस्यसाध्याभावनावच्छेदकसमनियतप्र
तियोगिताकत्वाभावादेवन्युदासइतिवाच्यंतथासतिघटभेदतदन्यप्रमेयैतदुभयाभावपटभेदतदन्यप्रमेयैतदुभयाभावघटितकूटाधिक
रणाप्रसिद्ध्याप्रमेयवान्वाच्यत्वादित्यत्राव्याप्तेर्दुर्वारत्वात् नचोभयत्वमप्येकविशिष्टापरत्वमेवेति वाच्यं तथासति वृत्तित्वालोकान्यत्वो
भयाभावमादायतादृशवृत्तितात्वेप्रतियोगिताव्यापकत्वदलव्यावृत्तिदानासंगतिरितिचेन्नसाध्यतावच्छेदकसमनियतप्रतियोगितायांस्व
न्यूनवृत्तिधर्मावच्छिन्नत्वस्यस्वयमेवनिवेशिततयास्वन्यूनवृत्तिपदेनस्वावच्छिन्नानधिकरणसाध्याधिकरणनिष्ठभेदप्रतियोगितावच्छे
दकतावच्छेदकत्वेसति स्वसमानाधिकरणधर्मस्यविवक्षितत्वादेवोक्ताभावेन्युदासात् साध्याधिकरणत्वनिवेशाच्चवन्हिधूमोभयवान्व
ह्नेरित्यादावुभयाभावादेःसंग्राह्यतयानातिव्याप्तिरिति।।वस्तुतस्तुएतदस्वरसेनैवएतल्लक्षणमपहायएतेनेत्यादिनालक्षणान्तरानुधावनं
कृतम्।अतएवपरलक्षणेसाध्याभावेसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वनिवेशेवह्निमान्धूमादित्यत्रेवाव्याप्तिसं
भवेतामपहायवाच्यंज्ञेयत्वादितिसत्तावान्द्रव्यत्वादित्ये कव्यक्तिसाध्यकेजगदीशस्याव्याप्तिदानमपिसंगच्छतइतिध्येयं अत्रचहेत्व
धिकरणयत्किंचिद्व्यक्तौदैशिकविशेषणतयाकूटस्यवर्तमानत्वमेवतुसामानाधिकरण्यंबोध्यंतेनपृथिवीद्रव्यत्वप्रकारकप्रमाविशेष्यत्वादिः

जा-व्य स्यादौजलेतेजसिचसाधनसमानाधिकरणस्यजलावृत्त्यभावस्यतेजोवृत्त्यभावस्यचउक्तरूपावच्छिन्नप्रतियोगिकत्वात्तदुभयकूटाधिकरण
का-शं जात्यादौहेतोरवृत्तित्वेपिनातिव्याप्तिः हेत्वधिकरणजलादिप्रत्येकनिष्ठयत्ताद्दशकूटंतदधिकरणेजलादौहेतोःसत्वादितिजगदीशाः अत्रेयं
१९ मनुपपत्तिः अथात्रसाधनसमानाधिकरणस्यविपक्षीभूततत्तद्व्यक्तिभेदाभावस्यापिसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताक
त्वात्तत्तद् घटितकूटाधिकरणाप्रसिद्ध्यैवातिव्याप्त्यसंभवेतद्वारकहेत्वधिकरणयत्किंचिद्व्यक्तौदैशिकविशेषणतयावर्तमानत्वमित्यादिविशे
षणवैयर्थ्यमितिचेदत्रकेचित् साध्यतावच्छेदकसंबंधेनव्यापकत्वंतत्संबंधावच्छिन्नप्रतियोगिताकत्वमभावविशेषणमित्यभिप्रायेणएत
द्ग्रंथसंगतिरित्याहुः। तन्मंद साध्यतावच्छेदकसंबंधेनसाध्यव्यापकत्वमित्यादिमतस्यग्रंथकृतैवप्राग्दूषितत्वान्नइतिमेवम् यद्यत्संबंधेन
व्यापकत्वंतत्तत्संबंधावच्छिन्नप्रतियोगिनाकसाध्याभावकूटनिवेशापेक्षयालाघवेनसाध्यव्यापकताघटकभूतयत्किंचित्संबंधावच्छिन्न
प्रतियोगिताकसाध्याभावकूटवत्त्वंविवक्षितम् तथाचपृथिवीत्वद्रव्यत्वप्रकारकप्रमाविशेष्यत्वादित्यादौसाध्यव्यापकताघटकीभूतसमं
वायसंबंधावच्छिन्नप्रतियोगिताकसाध्याभावकूटाधिकरणवृत्तित्वाभावस्यहेतौसत्त्वेनातिव्याप्तिरतोहेत्वधिकरणयत्किंचिद्व्यक्तौदैशि
कविशेषणतयावर्तमानत्वंसाध्याभावविशेषणंदत्तम् इतिग्रंथकृतामभिप्रायइतिवयंसमाधिमहे। पत्रिकासमुदिता।। इतिजागदीशीव्य
धिकरणधर्मावच्छिन्नाभावस्यटिप्पणंकालीशंकरीसमाप्ता।। वाराणसीप्रसादस्यनियोगेनप्रयत्नतः।। काशीसंस्कृतमुद्रायामंकितोयंशि
लाक्षरैः।।१।। श्रीकाशीजीमेंज्ञानवापीकेपूर्वफाटकपरश्रीविश्वनाथजीकेपासमहाराजशिवलालदुबेजीकेमकानमेंकाशीसंस्कृतमुद्राय
न्त्रमेंछपीजिनकोलेनाहोयउन्होंनेइसछापेखानेकेकार्यसंपादकबाबूवाराणसीप्रसादयाकचौरीगलीमेंभाईप्रतापसिंहजीकेदुकानपर राम
मिलेगी।। मितिअधिकआषाढशुक्ल ११ गुरुवार संवत १९३१ ॥ ॥ ॥ ॥ १९

इतिजागदीशीव्यधिकरणटिप्पणंकालीशंकरीसमाप्ता